कागजः। शकाब्दाः १६६७। स्था॰ नवद्वीपस्थब्राह्मणमहाराजश्रीयुतसतीशचन्द्ररायः।

प्रा॰वाक्यं। निःशरीरोऽपि भगवान् सशरीरेऽभिजायते। यो भक्तकृपया देवस्तं वन्देऽहं सनातनं।
क्रोधं वाहिनपुङ्गवं देवतियं गुणराशिनिः। निराकृतिरपौरुषो गडवत् यःसनोऽस्तु॥

समाप्तिवाक्यं। इति भवनजगद् विभर्ति या सा मधुरिपुमोचकरोन्द्रियस्वरूपा।
रमयति च वरं शिवात्मरूपा वितरतु वो विभवं शुभानि माया॥

विषयः। दुर्गाभक्तिमाहात्म्यादिकथनं।

CCXXXV.

Mahánila Tantra. On the devinity of Śiva and Śaktí, and their mantras.

२३५। महानीलतन्त्रं।

ग्रन्थकारः शिवः।

विवरणं। प्राचीनमपरिशुद्धञ्च। प॰ ८१। पङ्क्तिः॰ १-७। श्लो॰—?। ब॰ बङ्गीयं।
धां कागजः। का॰—?। स्था नवद्वीपस्थबगरमहाराजश्रीयुतसतीशचन्द्ररायः।

प्रा॰वा॰। कैलासशिखरारूढं देवदेवं जगद्गुरुं। सदा स्मेरमुखी दुर्गा पप्रच्छ नगनन्दिनी।

समाप्तिवाक्यं। यथा शक्या तु होमेन देशकालानुरूपतः। न विनश्यति कुर्वीत न शाठ्यं कुरुते सुधीः।
इति महानीलतन्त्रे हरगौरीसंवादे एकविंशः पटलः।

विवरणं। शिवशक्तिप्राधान्ययोगस्वरूपादिनिरूपणं।

CCXXXVI

Tárá pradípa. A compendium, in five chapters, on the principles of the Śákta faith, and the rules to be observed in the worship of Tárá. By Lakshmaṇa Deśika.

२३६। ताराप्रदीपः।

ग्रन्थकारः लक्ष्मणदेशिकः।

विवरणं। प्राचीनमपरिशुद्धञ्च। प॰ १० । पङ्क्तिः॰ ६-७। श्लो॰—?। ब॰ बङ्गीयं। धां
कागजः। का॰—?। स्था॰ नवद्वीपस्थबगरमहाराजश्रीयुतसतीशचन्द्ररायः।

प्रा॰वाक्य। पञ्चाशद्वर्णभेदा सकलगुणमयो नादबिन्दूपलाक्षी यासी सना विधाता परमगुरुवरो
निष्कलो निर्विकारः। आधारे लिङ्गनाभौ हृदि गलवदने भालदेशे स्वभावं यो
यो रामभद्रः स जयति नितरां योगिनां ज्ञानगम्यः।
नत्वा वेदाब्धिपारं द्विजकुलतिलकं श्रामदेकं विधामैर्लोकानां धर्महेतौ कलि-
भवविभवे तारकार्थे प्रयत्नात्। स्वच्छं सत्कारभूतं निविधजनाश्रितं मन्त्रतन्त्रादिगुप्तं
श्रावये भवमुक्तिं वरयजनविधौ शास्त्रमेतत् समस्तात्॥

समाप्तिवा० । एतद्रहस्यं परमं कथितं प्रतिगोपितं । न दद्यात् भक्तिहीनाय निर्धनाय कदाचन ॥

इति श्रीलक्ष्मणदेशिकविरचिते ताराप्रदीपे नानामन्त्रकथनं नाम पञ्चमः पटलः ।

विषयः । १ पटले मन्त्रसाधनविवरणं । २ पूजासङ्केतकथनं । ३ मन्त्रसङ्केतकथनं ।

४ साधनसङ्केतः । ५ नानामन्त्रकथनं ।

CCXXVII.

Kártavírya-dípadána Paddhati. Rules for dedicating lighted lamps to Kárta-vírya. By Lakshmaṇa Deśika.

२३७ । कार्तवीर्य्यदीपदानपद्धतिः ।

ग्रन्थकारः लक्ष्मणदेशिकः ।

विवरणं । प्राचीनसपरिशुद्धञ्च । प० १६ । पङ्क्ति० ७-९ । श्लो० १५० । भा० बङ्गीयं ।

स्था० कागजः । का०—? । स्था० नवद्वीपस्थानगरस्थमहाराजश्रीयुतसतीशचन्द्ररायः ।

प्रा० वाक्यं । अथ कार्त्तवीर्य्यदीपदानप्रयोगः । तत्र वसन्तशिशिरवेमन्तऋतुषु वर्षाशरदोर्वा ।

वैशाखश्रावणाश्विनकार्त्तिकमार्गशीर्षपौषमाघ फाल्गुनमासेषु ॥

समाप्तिवा० । इति श्रीकार्त्तवीर्य्यदीपदानपद्धतिः समाप्ता ।

विषयः । कार्त्तवीर्य्यप्रीत्यर्थकदीपदानविवरणं ।

CCXXVIII.

Kályashṭaka. A hymn to Kálí, from the *Dakshiṇá-Kálí-Kalpa.* By Vishṇu.

२३८ । काल्यष्टकं ।

ग्रन्थकारः—? ।

विवरणं । प्राचीनतमपरिशुद्धञ्च । प० ७ । पङ्क्ति० ७-८ । श्लो० १०० । भा० बङ्गीयं ।

आ० कागजः । का०—? । स्था० नवद्वीपस्थानगरस्थमहाराजश्रीयुतसतीशचन्द्ररायः ।

प्रा० वाक्यं । भैरव उवाच ॥ सुखासीनं जगन्नाथं कैलासे गिरिजैकदा । आलिङ्ग्याह कथं वासं

दत्वाऽङ्कांश्च वल्लभे ॥

समाप्तिवा० । वाचा वृहस्पतिसमो गजवाजिवृन्दरंक्यप्रानचरणो दिवि मोदते च ।

इति श्रीदक्षिणकालिकाकल्पे विष्णुना विरचितं काल्यष्टकं समाप्तं ।

विषयः । कालिकास्तवः ।

CCXXXIX.

Sanatkumára Tantra. A Vaishṇava Tantra, attributed to Sanatkumára, one of the earliest Rishis. Its contents are; 1st. mantra of Vishṇu; 2nd. 3rd. & 4th. worship of Krishṇa; 5th. mystic mantras of Vishṇu; 6th. mystic mantras of Gopála; 7th. the form in which Gopála should be worshipped; 8th. Homa &c. explained; 9th. a charm for overcoming evils of every kind; 10th. ritual for attaining perfection in the mantras; 11th. initiation in the mantras.

२३८। सनत्कुमारतन्त्रं।

ग्रन्थकारः सनत्कुमारः।

विवरणं। नवीनसमपरिग्रहश्च। प० २८। पङ्क्तिः ६। श्लो० ४०४। अ० बङ्गीयं।
स्था० कागजः। का०—?। स्था० कलिकाताराजधानीयुतबाबुयतीन्द्रमोहनठाकुरः।

प्रा० वाक्यं। नमः कनककिञ्जल्कपीतनिर्म्मलवाससे। महाबलारिपुस्कन्धसृष्टचक्राय चक्रिणे॥
सुविविक्ते वने रम्ये सिद्धचारणसेविते। सनत्कुमारं नत्वाथ पप्रच्छेदं पुलस्त्यकः।

समाप्तिवा०। दक्षिणाभिमुखं कृष्णं दोलयेद् यः समाहितः।
त्रैलोक्यस्य ग्रहं साक्षात् नियमेऽग्र न विमुञ्चति।
इति सनत्कुमारीयतन्त्रे एकादशः पटलः।

विषयः। १ विष्णुमन्त्रकथनं। २-३-४ श्रीकृष्णपूजादिकथनं। ५ श्रीकृष्णविषयकमन्त्रान्तरकथनं। ६ गोपालमन्त्रकथनं। ७ गोपालपूजाकथनं। ८ होमादिनिर्णयः। ९ त्रैलोक्यमङ्गलकवचं। १० पुरश्चरणविधानं। ११ दीक्षाविधिकथनं।

CCLX.

Tantra Ratna. This MS. is incomplete; it contains 5 Patalas on the following subjects: viz. secret congregation; time for initiation; mystic diagrams; rituals; regulation of the breath and gesticulation during worship. By Śrikrishṇa Vidyávágíśa.

२४०। तन्त्ररत्नं।

ग्रन्थकारः श्रीकृष्णविद्यावागीशः।

विवरणं। नवीनसमपरिग्रहश्च। प० २९। पङ्क्तिः। ११-। श्लो० १८००। अ० बङ्गीयं।
स्था० कागजः। का०—?। स्था० कलिकाताराजधानीयुतबाबुयतीन्द्रमोहनठाकुरः।

प्रा० वाक्यं। नित्यानन्दां परां वन्दे ब्रह्मरूपां गुहाश्रयां। सर्वभूतमयीन्देवीं श्रीमत्त्रिपुरसुन्दरीं।

पुराणकरणं वन्दे गणेशं पार्वतीसुतं। यस्य स्मरणमात्रेण विघ्नाः दूरेभवन्ति हि।

समाप्तिवा०। खण्डितं।

विषयः। १ चक्रविचारः। २ दीक्षाकालनियमः। ३ सर्वतोभद्रमण्डलादिकथनं। ४ साङ्ग पूजनादिविधानं। ५ मातृकान्यासादिकथनं।

CCLXI.

Deví Upanishad. On the preeminence of the Deví as the supreme devinity.

२४१। देव्युपनिषत्।

ग्रन्थकारः—?।

विवरणं। नवीनमपरिशुद्धञ्च। प०२। पङ्क्तिः ९-७। श्लो०५०। अ० वङ्गीयं। आ० कागजः। का०—?। स्था० कलिकाताख्यग्रीयुतबाबुयतीन्द्रमोहनठाकुरः।

प्रा० वाक्यं। ओं सर्वे देवा देवीमुपतस्थुः। कासि त्वं महादेवी साब्रवीदहं ब्रह्मस्वरूपिणी। मत्तः प्रकृतिपुरुषात्मकं जगत् शून्यञ्चाशून्यञ्च अहमानन्दानानन्दौ।

समाप्तिवा०। प्राणप्रतिष्ठायां जप्त्वा प्राणानां प्रतिष्ठा भवति भौमाश्विन्यां महादेवीसन्निधौ जप्त्वा महामृत्युं तरति महामृत्युं तरति य एवं वेद इत्युपनिषत्। इति देव्याथर्वशीर्षं सम्पूर्णं।

विषयः। देव्याः जगत्कर्त्तृत्वादिप्रतिपादिनी ब्रह्मविद्या।

CCLXII.

Śakti-ratnákara. A work of the Tantra class in five chapters. Contents: 1st. an enquiry into what is Brahma; 2nd. the true nature of Durgá; 3rd. the merits of her many names; 4th. the merits of worshipping her; 5th. the nature and attributes of Mahávidyá.

२४२। शक्तिरत्नाकरः।

ग्रन्थकारः—?।

विवरणं। नवीनमपरिशुद्धञ्च। प०२१। पङ्क्तिः ९। श्लो०९२१। अ० वङ्गीयं। आ० कागजः। का०—?। स्था० कलिकातास्थश्रीयुतबाबुयतीन्द्रमोहनठाकुरः।

प्रा० वाक्यं। या शक्तिर्गिरिशस्य चतुरधिका दृष्टिःपरा शाम्भवी कण्ठे गीः श्रवणे रवा च रसना-

मध्ये रसैकात्मिका । प्राक्षे चाऽपि च योगमिका किमपरं प्राणात्मिका मानसे । वन्दे तां निगुणैकवन्दितपदां भूयोऽपवर्गप्रदां ।

समाप्तिवा० । मकारः सिद्धिदः प्रोक्तो रेफः पापस्य दाहकः ।
उकारः शम्भुरित्युक्तस्तिमात्मा गुरुः परः ।
गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुदेवात् परं नास्ति तस्मै श्रीगुरवे नमः ।
इति भक्तिरत्नाकरे श्रीविद्यामहाविद्यानिरूपणं नाम पञ्चम उल्लासः । समाप्तश्चायं ग्रन्थः ।

विषयः । १ ब्रह्मनिरूपणं । २ दुर्गास्वरूपनिरूपणं । ३ भगवत्या नाममाहात्म्यं । ४ दुर्गाराधनमाहात्म्यं । ५ महाविद्यानिरूपणं ।

CCLXIII.

Urdhámnáya Sanhitá. A treatise on modern Vaishṇava faith, attributed to Nárada. Its contents are; 1st. faith in the spiritual guide; 2nd. incarnations; 3rd. derivation of the mystic mantra for the worship of Gaura and Chaitanya; 4th. praise of the *tulasi* plant; 5th. praise of the river Ganges; 6th. worship of the spiritual guide; 7th hymn to Náráyaṇa; 8th. praise of Gayá as a place of pilgrimage; 9th praise of the month Kártika, as the season meat for the performance of religious acts; 10th. various sects of Vaishṇavas; 11th. worship of Vaishṇava saints; 12th. offences against the Vaishṇava religion.

२४३ । ऊर्द्ध्वाम्नायसंहिता ।

ग्रन्थकारः नारदः ।

विवरणं । नवीनमपरिशुद्धञ्च । प० १४ । पङ्क्तिः ९ । श्लो० २५२ । अ० वङ्गीयं ।
आ० कागजः । का०—? । स्था० कलिकातास्थश्रीयुतबाबुयतीन्द्रमोहनठाकुरः ।

प्रा० वाक्यं । कदाचित् सुखमासीनं नारदं मुनिसत्तमं । पप्रच्छ नियतो भूत्वा व्यास लोकनमस्कृतः ॥
महामुने कथय मे विष्णुभक्तिमनुत्तमं । विष्णुभक्तिश्च कात्स्न्येन कवतारगुणांस्तथा ।

समाप्तिवा० । अष्टादशपुराणानि महाभारतमेव च । श्रुत्वा यत् फलमाप्नोति तदूर्द्ध्वाम्नायसंश्रवात् ।
प्रत्यहं पूजनं कुर्य्यात् पुस्तकस्य तु वैष्णवः । लक्ष्मीनारायणपटे संस्थाप्य भक्तिभावतः ॥
इत्यूर्द्ध्वाम्नायसंहितायामपराधकथनं नाम द्वादशोऽध्यायः ।
इत्यूर्द्ध्वाम्नायसंहिता समाप्ता ।

विषयः। १ गुरुभक्तिकथनं। २ श्रवणारकीर्त्तनं। ३ गौरमन्त्रोद्धारः। ४ तुलसीमाहात्म्यवर्णनं। ५ गङ्गामाहात्म्यं। ६ गुर्वादिपूजाकथनं। ७ नारायणस्तवः। ८ गयामाहात्म्यं। ९ कार्त्तिकमासमाहात्म्यं। १० वैष्णववर्गगणनं। ११ वैष्णवसदाचारपूजा। १२ अपराधकथनं।

CCXLIV.

Tantra-gandharva. An elaborate treatise on the various subjects of Śákta religious observances, attributed to Dattátreya, author of one of the original Smritis.

२४४। तन्त्रगन्धर्वः।

ग्रन्थकारः दत्तात्रेयः।

विवरणं। नवीनमपरिशुद्धञ्च। प० १८२। पङ्क्ति ९। श्लो० ४५०५। अ० बङ्गीयं। आ० कागजः। का०—?। स्था० कलिकाताशाखायोगुतबाबुयतीन्द्रमोहनठाकुरः।

प्रा० वाक्यं। यं वदन्त्यमलात्मानः पुरुषं प्रकृतेः परं। चिद्रूपं परमानन्दं वन्दे तं विघ्ननाशनं। भर्त्तारं गुणहद्विशून्यमचलं मत्वाऽभिसारक्रमादिच्छन्ती कुलवर्त्मनैव गुणवत्यानन्दमातन्वती। श्रेते सुप्तभुजङ्गपोतकुटिला या मेरुमूलं गता सूते जन्मगतानि तानि पुरजिन्मुखानि पायादसौ।

समाप्तिवा०। अनेन ज्ञानमाप्नोति संसारार्णवनाशनं। तस्मादेवं विदित्वैव कैवल्यं फलमश्नुते। इति तन्त्रगन्धर्वे द्विचत्वारिंशत् पटलः।

विषयः। १ देवीं प्रति महादेवस्य गोलमोक्षप्राप्त्यादीनामनादेयत्वकथनं। २ शक्तिमन्त्रकथनं। ३ पञ्चमीविद्यामाहात्म्यं। ४ त्रिपुराकवचः। ५ त्रिपुरसुन्दर्य्यायमन्त्रादिकथनं। ६ त्रिपुरादेव्याः पूजादिकथनं। ७-८-९ १० षोडशमातृकान्यासकथनं। ११ करशुद्ध्यादिकथनं। १२ षोडशोपचारपूजादिकथनं। १३ षाड्गुण्यप्रयोगविधानं। १४ खेचर्य्यादिनानाविधमुद्राकथनं। १५ पूजोपचारकथन। १६ मण्विशेषादिकथनं। १७ प्रकटादिशक्तिविशेषपूजनं। १८ जपविधानं। १९ वटुकादिविधानं। २० —२१-२२ शिवकादेव्याः पूजनादिविधानं। २३ कुमारीपूजाकथनं। २४ नतफलकथनं। २५ पुष्पभेदादिकथनं। २६ गुरुशिष्यलक्षणकथनं। २७ दीक्षाविधानं। २८-२९ पुरश्चरणविधानं। ३० पंचमन्त्रजपकथनं। ३१ होमविधानं। ३२ मुद्राधारणविधिः। ३३ पूजाधिष्ठानस्थानकथनं। ३४ कुलाचारादिकथनं। ३५ रात्रौ शक्तिविशेषपूजाकथनं। ३६ कुलपूजाकथनं। ३७ ३८ शक्ति-

माहात्म्यं। ३९ कौलाचारकथनं। ४० शिवशक्तिज्ञानं। ४१-४२ तत्त्वज्ञान-कथनं।

CCXLV.

Kula-chúdá-maṇi Tantra. This MS, is incomplete. Its subject is the adoration of the Deví through the medium of wine, women &c. It is one of the text books of the Kaulas, a sect of lecherous drunkards.

२४५। कुलचूडामणितन्त्रं।

ग्रन्थकारः—?

विवरणं। नवीनमपरिशुद्धञ्च। प० २१। पङ्क्ति ५। श्लो० ४६०। आ० बङ्गीयं।

आ० कागजः। का०—?। स्था० कलिकाताश्यामपुकुरवासियतीन्द्रमोहनठाकुरः।

प्रा० वाक्यं। अनङ्गा त्रिपुरा देवि अनङ्गमाला च कालिका।

वागीश्वरी तथाऽनङ्गा तथा चान्यकुलाकुला॥

मातङ्गिनी तथा पूर्णा विमला चण्डनायिका।

त्रिपुरैकजटा दुर्गा या चान्या कुलसुन्दरी॥

वैष्णवं गाणपत्यञ्च तथा सौरमतं तथा। शैवं शाङ्करजं तच्च यत्किञ्चिद्भूतसम्भवं॥

समाप्तिवा०। खण्डितं।

१ पटले कुलतन्त्रप्रशंसा। २ कौलकर्त्तव्यानुष्ठानकथनं। ३ कुलशक्तिपूजा-विधानं। ४-५-६ कौलिकानुष्ठानविशेषः। ७ मद्यमहिम्ना सवादिकथनं।

CCXLVI.

Kankála-máliní Tantra. An original Tantra in fifty thousand verses. The portion found contains: 1st. the relation of the Deví to the letters of the alphabet; 2nd. the mystic diagram of the *Yoni*; 3rd. adoration of the spiritual guide; 4th. the mantra of Mahákálí; 5th the mode of praying with it.

२४६। कङ्कालमालिनीतन्त्रं।

ग्रन्थकारः—?

विवरणं। नवीनमपरिशुद्धञ्च। प० १८। पङ्क्ति० ९। श्लो० १०९। आ० बङ्गीयं।

आ० कागजः। का०—?। स्था० कलिकाताश्यामपुकुरवासियतीन्द्रमोहनठाकुरः।

प्रा० वाक्यं। श्री भैरव उवाच। त्रिपुरेश महेशान पार्वतीप्राणवल्लभ।

जगद्वन्द्य मूलपाठे वर्णानां कारणं वद ॥

समाप्तिवा० । प्रत्यहं प्रजपेदादौ तदा सिद्धिः प्रजायते । सत्यं सत्यं परं सत्यं सत्यपूर्वं समीरितं । इति दक्षिणाम्नाये साईलक्षग्रन्थे कङ्कालमालिनीतन्त्रे पुरश्चरणादिकथनं नाम पञ्चम पटलः ।

विषयः । १ अकारादिवर्णानां शिवशक्तिस्वरूपकथनं । २ योनिमुद्राकथनं । ३ गुरुपजातनकवचादिकथनं । ४ महाकालीमन्त्रकथनं । ५ पुरश्चरणविधानं ।

CCXLVII.

Guru Tantra. The spiritual guide, his character and adoration.

२४७ । गुरुतन्त्रं ।

ग्रन्थकारः —?

विवरणं । नवीनं परिग्रहद्य । प० २२ । पङ्क्ति० ४ । श्लो० २६४ । आ० वर्त्तीयं । आ० कागजः । का०—? । स्था० कलिकातास्थश्रीयुतबाबुयतीन्द्रमोहनठाकुरः ।

प्रा० वाक्यं । कैलासशिखरासीनं देवदेवं जगद्गुरुं । शङ्करं रहसि प्रीत्या पप्रच्छ परमेश्वरी ।
श्रीदेव्युवाच । देवदेव जगद्वन्द्य सृष्टिस्थित्यन्तकारक ।
परमेश महेशान सर्वभूतहिते रत ॥

समाप्तिवा० । इत्युक्तं मम तन्त्रराजमतुलं पुण्यं यशस्यं क्षती नित्यं ब्रह्म महेश्वरीगुरुपदं ध्यात्वा सदा वै पठेत् । तस्यासीत किल भक्तिशक्तिघटिता मुक्तिः करस्थायिनी । वश्य याति महीपतिः प्रतिदिनं लक्ष्मीश्वरोऽथं भवेत् ॥ इति श्रीगुरुतन्त्रे पञ्चमः पटलः ॥

विषयः । गुरुध्यानपूजामाहात्म्यादिकथनं ।

CCXLVIII.

Brahmáṇḍa-jnána Tantra. A Tantra on the origin and destruction of the universe, and the knowledge of the devine essence.

२४८ । ब्रह्माण्डज्ञानतन्त्रं ।

ग्रन्थकारः ।

विवरणं । नवीनं परिग्रहद्य । प० १० । पङ्क्ति० ६ । श्लो० १४० । च० बङ्गीयं । आ० कागजः । का०—? । स्था० कलिकातास्थश्रीयुतबाबुयतीन्द्रमोहनठाकुरः ।

प्रा० वाक्यं । कैलासशिखरासीनं देवदेवं जगद्गुरुं । पृच्छत्यं व ... देवी ब्रह्मज्ञानं महेश्वरं ।

कुतः सृष्टिर्भवत्येव कुतः सृष्टिर्विनश्यति । महाप्राणं कथं देव सृष्टिसंहारवर्जितं ।

समाप्तिश्चा० । पुस्तकमिदं देवि विचार्य्यं प्रकाशयेत् ।

निन्दका यान्ति नरकं नाहं यामि महेश्वरि ।

इति श्रीपार्वतीश्वरसंवादे वृहत्काण्डमहाराजतन्त्रे पञ्चमः पटलः ।

विषयः । सृष्टितत्त्वनिरूपणं ।

CCXLIX.

Uttara Tantra. This treatise includes ten chapters on the following subjects of the Śákta faith, viz: 1st. duties of the faithful; 2nd. the mode of performing them; 3rd. proper persons for initiation into the faith; 4th. discription of *Kula-Śakti*; 5th. the peculearities of the persons who are fit to worship her; 6th. different forms of Śakti; 7th. praise of Śakti; 8th. praise of a disgustingly obscene form of worship called *Sayambhu-kusuma*; 9th. different forms of seats proper during worship; 10th. praise of sacrifice.

२४९ । उत्तरतन्त्रं ॥

ग्रन्थकारः—?

विवरणं । नवीनमपरिशुद्धञ्च । प० ११ । पङ्क्ति० ६ । श्लो० ११० । आ० वर्त्तुलं ।

भा० कागजः । का०—? स्था० कलिकाताराजधानीयुवराजयतीन्द्रमोहनठाकुरः ।

प्रा० वाक्यं । वदःस्थले समासीना देवी पप्रच्छ शङ्करं ।

भगवन् साधकानाञ्च कथयस्व क्रियाविधिं । श्रुतानि सर्वतन्त्राणि यामलादीनि वै प्रभो ।

कुत्रापि न श्रुतो देव क्रियाया विधिरुत्तमः ।

समाप्तिर्वा । ताम्रपात्रे कपाले वा शशानकाष्ठनिर्म्मिते । अनिर्भौमदिने वाऽपि न दारे मृतसम्भवे ।

इत्युत्तरतन्त्रे हरपार्वतीसंवादे दशमः पटलः ।

विषयः । १ क्रियाविधानं । २ प्रयोगः । ३ पात्रनिर्णयः । ४ कुलशक्तिकथनं । ५ कुलसाधकलक्षणं । ६ कलाप्रशंसा । ७ शक्तिप्रशंसा । ८ स्वयम्भूकुसुममाहात्म्यं । ९ आसनविधानं । १० बलिप्रशंसा ।

CCL.

Haṭha-dípiká. A Yoga manual, by Svátmáráma. Its contents are; 1st. overcoming of the passions and regulation of habits; 2nd. regula-

tion of the breath; 3rd. mystic diagrams; 4th. the highest form of meditation.

२४९। हठदीपिका।

ग्रन्थकारः स्वात्मारामः।

विवरणं। नवीनमपरिशुद्धञ्च। प० १४। पङ्क्ति० ८। श्लो० ४४८। अ० बङ्गीयं। आ० कागजः। का०—?। स्था० कलिकातास्थश्रीयुतबाबुयतीन्द्रमोहनठाकुरः।

प्रा० वाक्यं। श्रीआदिनाथाय नमोऽस्तु तस्मै येनोपदिष्टा हठयोगविद्या।
विराजते प्रोन्नतराजयोगमारोढुमिच्छोरधिरोहणीव॥
प्रणम्य श्रीगुरुं नाथमात्मारामेण योगिना। केवलं राजयोगाय हठविद्योपदिश्यते॥
भ्रान्त्या बहुमतध्वान्तराजयोगमजानतां। हठप्रदीपिकां धत्ते स्वात्मारामः कृपाकरः॥

समाप्तिवा०। खण्डितं।

विषयः—?। १ यमनियमासनलक्षणं। २ रेचकादिप्राणायामलक्षणं। ३ खेचर्य्यादिमुद्राकथनं। ४ समाधिक्रमकथनं। अत्र किञ्चिन्न्यूनचत्वारः पटलाः सन्ति।

CCL.

Adbhuta-Charita. Terrestrial, atmospheric and celestial portents, and the mode of overcoming their evil effects by mantras and religious observances.

२५०। अद्भुतचरितं।

ग्रन्थकार ईश्वरः।

विवरणं। नवीनमपरिशुद्धञ्च। प० १४। पङ्क्ति० ७। श्लो० २९२। अ० बङ्गीयं। आ० कागजः। का०—?। स्था० कलिकातास्थश्रीयुतबाबुयतीन्द्रमोहनठाकुरः।

प्रा० वाक्यं। दुर्निमित्तान्यथो वक्ष्ये शृणुध्वं मुनिपुङ्गवाः।
येषां यद्यद्भवेद्दोषस्तेषां शान्तिं यथाक्रमात्॥

समाप्तिवा०। चन्द्रमण्डलकद्वन्द्वं उल्कावज्रप्रपातनं। दर्शने राष्ट्रदुर्भिक्षं मरकं नृपतिक्षयः॥
इतीश्वरभाषिताद्भुतचरितं समाप्तं॥

विषयः। भौमदिव्यान्तरीक्षविविधोत्पातशान्तिकथनं।

No. CCLI.

Dattátreya Sañhitá. A work of the Tantra class, on the details for the performance of Yoga, or meditation for the attainment of perfection in this life. By Dattátreya.

२५१ । दत्तात्रेयसंहिता ।

ग्रन्थकारः दत्तात्रेयः ।

विवरणं । नवीनं परिष्कृतप्रायश्च । प० ९ । पङ्क्ति० ९ । श्लो० १९५ । व० वङ्गीयं । स्था० कामजः । का०—? । स्था० कलिकातास्थश्रीयुतबाबुयतीन्द्रमोहनठाकुरः ।

प्रा० वाक्यं । कर्मिकपिले चिदात्मने सुखरूपिणे ।
यस्मै त्रिभिरुद्रादिभिर्नमोऽपि तायते नमः ॥
साङ्कृतिर्मुनिवर्य्योऽसौ भूतले योगमिच्छया ।
चकार परिभ्रम्य नैमिषारण्यमाप्नवान् ॥
सुगन्धि नानाकुसुमैः स्वादुसत्फलपल्लवैः ।
शाखाभिः शोभितं पुण्यं अखण्डासारमण्डितं ॥
समुनिर्मिषरं तत्र ददर्शास्य तरोरधः ।
वेदिकायां समासीनं दत्तात्रेयं महामुनिं ॥

समाप्तिवा० । महामायाप्रसादेन सर्व्वमेतमखिलं तत् सुखं ।
एतत् सर्व्वं यथा युक्तं तदेव धारयेत्ततः ॥ इति दत्तात्रेयभाषिते योगप्रकरणे दत्तात्रेयसंहिता समाप्ता ।

विषयः । योगाङ्गयमनियमादिषडङ्गविषयोगोपायकथनं ।

No. CCLII.

Adbhuta-sára. Terrestrial, atmospheric and celestial omens of approaching evils, such as earthquakes, meteors, comets, &c., and the means of obviating their mischievous effects. This work quotes No. CCL. By Mahádeva Sarmá.

२५२ । अद्भुतसारः ।

ग्रन्थकारः महादेवः ।

विवरणं । नवीनं परिष्कृतप्रायश्च । प० १९ । पङ्क्ति० ७ । श्लो० ४८० । व० वङ्गीयं । स्था० कामजः । का०—? । स्था० कलिकातास्थश्रीयुतबाबुयतीन्द्रमोहनठाकुरः ।

प्रा० वाक्यं । नत्वा श्रीमत्पदद्वन्द्वं आचार्य्यालोक्य भूरिशः ।
लिख्यतेऽद्भुतसारोऽयं श्रीमहादेवशर्म्मणा ॥

आद्याङ्कं । वशिष्ठसंहितायां ।

अथातः सम्प्रवक्ष्यामि उत्पाताध्यायमुत्तमं ।

अव्यक्तं प्रकृतेर्येन ताबादुत्पातसम्भवं ॥

समाप्तिवा०। प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्त्तते ।

न साम्परायिकं तस्य दुर्मतेर्विद्यते फलं ॥ इत्यद्भुतसारः समाप्तः ।

विषयः । दिव्यनाभसभूमिजविविधोत्पातशान्तिकथनं ।

No. CCLIII.

Sárachintámaṇi. A Tantra compilation on *Dikshá* or initiation in the mantras, and the rituals of S'ákta worship. By Bhavániprasáda.

२५३ । सारचिन्तामणिः ।

ग्रन्थकारः भवानीप्रसादः ।

विवरणं । नवीनमपरिशुद्धञ्च । प० १५४ । पङ्क्ति० ८ । श्लो० ५५४४ । अ० बङ्गीयं । आ० कागजः । शकाब्दाः १७५४ । स्था० कलिकाताख्यश्रीयुतबाबुयतीन्द्रमोहनठाकुरः ।

प्रा० वाक्यं । नत्वा श्रीशिवसुन्दरीपदयुगं नित्यं हि यद्योगिनो

ध्यानाधस्थहृदोऽप्यमी पुनरतं नाशाहिताः सत्परं ।

तन्त्राणां कतिचिन्मतानि कियतां श्रीमद्भवानीप्रसा-

देनोद्धृत्य वितन्यतेऽर्चनविधिः श्रीसारचिन्तामणिः ॥

समाप्तिवा०। पृष्ठे द्वेषो भवति च सत्यं मध्ये रोगो विलसति नित्यं ।

क्रोडे मृत्युं वदति मनोज्ञः क्रोडे पृष्ठे वदने सुखमेः ॥

क्रोडे मा * * * * सन्नाम मध्ये पृष्ठे । इति समाप्तः ।

विषयः । दीक्षाव्यवस्थाकलमाद्दिवसादिविधिनित्यानुष्ठानपूजामन्त्राद्यन्यादिवहुविषयशास्त्रवि-

षयकानुष्ठानकथनं ।

No. CCLIV.

Gheraṇḍa Sañhitá. A Tantra, in seven chapters, on *Upadesa*, or the mode of performing the Yoga form of S'ákta worship. By Gheraṇḍa.

२५४ । घेरण्डसंहिता ।

ग्रन्थकारः घेरण्डः ।

विवरणं । नवीनमपरिशुद्धञ्च । प० १९ । पङ्क्ति० ९ । श्लो० ४५९ । अ० बङ्गीयं । आ० कागजः । का०—? । स्था० कलिकाताख्यश्रीयुतबाबुयतीन्द्रमोहनठाकुरः ।

प्रा॰ वाक्यं। आदीश्वराय प्रणमामि तस्मै येनोपदिष्टा हठयोगविद्या।
विराजते प्रोन्नतराजयोगमारोढुमिच्छन् विधियोग इव॥
एकदा चण्डकापालिर्गत्वा घेरण्डकुट्टिरं।
प्रणम्य विनयाङ्गत्या घेरण्डं परिपृच्छति॥
चण्डकापालिरुवाच।
घटस्थयोगं योगेश तत्त्वज्ञानस्य कारणं।
इदानीं श्रोतुमिच्छामि तद्वद त्वं योगेश्वर॥

समाप्तिवा॰। इति ते कथितं चण्ड समाधिं दुर्लभं परं।
यज्ज्ञात्वा न पुनर्जन्म जायते भूमिमण्डले॥
इति घेरण्डसंहितायां घटस्थयोगसाधने घेरण्डचण्डसंवादे समाधियोगो नाम सप्तमोपदेशः।

विषयः। १ उपदेशे धौत्यादिषट्कर्मकथनं। २ घटस्थयोगकथनं। ३ घटस्थयोगमुद्राप्रकरणं। ४ प्रत्याहारप्रयोगकथनं। ५ प्राणायामलक्षणं। ६ ध्यानयोगकथनं। ७ समाधियोगः।

No. CCLV.

Dakshiṇá-Káliká-sañkshepa-pujá-prayoga. A compilation, from divers Tantras, on the details of worshipping Dakshiṇá Kálí. By Harakumára Ṭhákura. The author was a member of the Tagore family of Calcutta, and died about fourteen years ago.

२५५। दक्षिणकालिकासङ्क्षेपपूजाप्रयोगः।

ग्रन्थकारः हरकुमारठाकुरः।

विवरणं। नवीनं परिष्कृतञ्च। प॰ २९। पङ्क्ति॰ ८। श्लो॰ ४९८। अ॰ बङ्गीयं। आ॰ कागजः। का॰—? स्था॰ कलिकाताख्यश्रीयुतबाबुयतीन्द्रमोहनठाकुरः।

प्रा॰ वाक्यं। तत्रादौ प्रातरुत्थाय शय्यायां साधक उत्तराभिमुखो भूत्वा समासीनो दक्षिण-कर्णोपरि वामहस्तं निधाय शिरःस्थमहस्रदलकमले शिवस्वरूपिणमित्यादि।

समाप्तिवा॰। कुमारीपूजनकर्मणः साङ्गतार्थं दक्षिणामिदं रजतं कुमार्य्यै अहं ददे। ततो अच्छिद्रावधारणं कुर्य्यात्। इति कुमारीपूजा।

विषयः। दक्षिणकालिकायाः आसनशुद्ध्यादिसहितपुरश्चरणादिविधानं।

No. CCLVI.

Siddha-nágárjuníya. A Tantra on the attainment of supernatural powers, and the means of causing death by imprecation, and securing the good-will and affection of kings, women, &c. By Síddhanágárjuna.

२५६ । सिद्धनागार्जुनीयः ।

ग्रन्थकारः सिद्धनागार्जुनः ।

विवरणं । नवीनमपरिशुद्धञ्च । प० ७१ । पङ्क्ति० ९ । श्लो० १८०० । व० वङ्गीयं । आ० कागजः । का०—? । स्था० कलिकातास्थश्रीयुतवाबुयतीन्द्रमोहनठाकुरः ।

प्रा० वाक्यं । यः शम्भुः परमात्मयः परशिवः कः कालकालान्तको
धामानन्तमनादिनित्यनिचयः सद्भक्तसङ्गोचयेत् ।
चाभासानरञ्जकः समरसः सर्व्वात्मसंबोधकः
सोऽयं सर्व्वमिदं ददातु ममतां विद्यादिसिद्ध्यर्थकं ॥

समाप्तिवा० । ॐ नमो समुद्रतीरे वलिखिलिवाडोलागुरुयोगीया कपमाला भस्मान्तकरि चाधीया वेतालयोमचारी शक्तिपुरे ॐ फट् स्वाहा ॥ ० ॥ ह्ह मन्त्रसिपाय तिने चेडरा १० पगि येवलि इत्यादिदृश्यते ।
इति श्रीसिद्धनागार्जुनविरचिते कक्षपुटे सर्व्वसङ्ग्रहनाम एकविंशतितमः पटलः ॥ समाप्तोऽयं ग्रन्थः ।

विषयः । मन्त्रसाधनं — वशीकरणं — राजादिवशीकरणं — मारणोच्चाटनादिप्रयोगः ।

No. CCLVII.

Yantra-Chintámaṇi. A Tantra compilation, by Dámodara, on fascinating, killing, paralyzing, &c., females, kings and enemies, by means of charms and mystic diagrams.

२५७ । यन्त्रचिन्तामणिः ।

ग्रन्थकारः दामोदरः ।

विवरणं । प्राचीनमपरिशुद्धञ्च । प० २२ । पङ्क्ति० ११—१२ । श्लो० ६६० । व० वङ्गीयं । आ० कागजः । का०—? । स्था० कलिकातास्थश्रीयुतवाबुयतीन्द्रमोहनठाकुरः ।

प्रा० वाक्यं । यं ध्यायन्ति सुरासुराश्च निखिला यक्षाः पिशाचोरगाः
राजानश्च तथा मुनीन्द्रनिवहाः सर्व्वार्थसंसिद्धये ।
सन्नाना वरद, भवभयहर पाशाङ्कुशाढ्यकर
चञ्चच्चारवीच्यमानममितं सोऽस्तु श्रेयसे शङ्करं ॥

समाप्तिवा० । नित्यं नद्यां प्रदातव्यमहोगरसवत्सकं ।

परस्परं भवेत् द्वेषः सिद्धयोग उदाहृतः ॥

ॐ आमोदकि प्रमोदकि गौरि मे गौरि अमुकस्यामुकेन सह काकोलुकादिवत

कुरु कुरु स्वाहा ॥ समाप्तश्चायं ग्रन्थः ॥

विषयः । वशीकरणमारणस्तम्भनोच्चाटनादिविधानं ।

No. CCLVIII.

Kulárnava Tantra. An original Tantra, attributed to S'iva. Contents : 1, creation and existence of humanity; 2, advantages of the Kulácházra system of worship ; 3, praise of Urdhámnáya and other Tantras on the subject ; 4, derivation of mantras ; 5, articles necessary for the *Kula* form of worship ; 6, purification of those articles of sacrifice and of Vatuka ; 8, Rules for drinking wine ; 9, Yoga, as performed by the followers of the Kula system ; 10, worship on particular auspicious days ; 11, Rules of the Kula system ; 12, adoration of the shoes of the spiritual guide ; 13, characteristics of the spiritual teacher and the taught ; 14, their trials ; 15, attainment of power over mantras ; 16, desirable objects ; 17, name of the Guru, &c.

२५८ । कुलार्णवतन्त्रं ।

ग्रन्थकारः शिवः ।

विवरणं । नातिनवीनं परिशुद्धप्रायञ्च । प० ७९ । पङ्क्ति० ९ । श्लो० १२७० । आ० वर्त्तुलं । आ० कागजः । का०—? । स्था० कलिकातास्यश्रीयुतबाबुयतीन्द्रमोहनठाकुरः ।

प्रा० वाक्यं । भगवन् देवदेवेश पञ्चवक्त्र विधायक । सर्व्वज्ञ भक्तिसुलभ शरणागतवत्सल ॥

कुलेश परमेशान करुणामृतवारिधे । असारे घोरसंसारे सर्व्वदुःखमलीमसे ॥

समाप्तिवा० । ऊर्द्धाम्नायः समाख्यातः समासेन च विस्तरात् ।

कुलार्णवमिदं प्रोक्तं योगिनामुपवर्णितं ॥

इति श्रीकुलार्णवमहारहस्ये सर्व्वागमोत्तमे सपादलक्षग्रन्थे पञ्चमखण्डे गुरुनामवासनादिकथनं नाम सप्तदशोल्लासः ।

विषयः । १ जीवस्थितिकथनं । २ कुलमाहात्म्यकथनं । ३ ऊर्द्धाम्नायादिमाहात्म्यं । ४ मन्त्रोद्धारादिकथनं । ५ कुलद्रव्यनिर्माणादिविधिः । ६ कुलद्रव्यसंस्कारादिकथनं । ७ वटुकादीनां बलिप्रदानादिकथनं । ८ पानभेदादिकथनं । ९ कुलयोगादिकथनं । १० विशेषदिवसपूजाकथनं । ११ कुलाचारविधिकथनं ।

१२ श्रीपादुकाभक्तिलक्षणकथनं। १३ गुरुशिष्यलक्षणकथनं। १४ गुरुशिष्य परीक्षादिकथनं। १५ पुरश्चरणादिकथनं। १६ काम्यकर्मकथनं। १७ गुरुनाम-वासनादिकथनं।

No. CCLIX.

Yogávali Tantra. Tantric explanation of the Yoga dogma.

२५९। योगावलितन्त्रं।

ग्रन्थकारः ——?

विवरणं। नवीनमपरिशुद्धञ्च। प० १७। पङ्क्ति० ४। श्लो० १७२ अ० वङ्गीयं। आ० कागजः। का०—?। स्था० कलिकाताराजश्रीयुतबाबुयतीन्द्रमोहनठाकुरः।

प्रा० वाक्यं। महादेव उवाच। एकीभूतं यथाऽऽकाशः शरीरं जायते तथा।
पद्मं सप्तदलं चक्रं प्रमाणं द्वादशाङ्गुलं॥
तस्य मध्यगते वायौ तदा गर्भः प्रजायते। वामचक्रे भवेन्नारी दक्षिणे पुरुषोमतः॥

समाप्तिवा०। मूलाधारे पुनः पीला पिङ्गलाय गुणद्वये।
एवं ज्ञात्वा महादेवि पुनर्जन्म न विद्यते॥
इति योगावलीतन्त्रे हरगौरीसंवादे मोक्षसाधने पञ्चमपटले कुलदीपनी समाप्ता।

विषयः। देहोत्पत्त्यादिनिवृत्तिपूर्व्वकं योगविशेषादिकथनं।

No. CCLX.

Tantra-pramoda. Rules for the performance of the Homa for initiation into the Tantric doctrine.

२६०। तन्त्रप्रमोदः।

ग्रन्थकारः रामेश्वरः।

विवरणं। नवीनं परिशुद्धप्रायञ्च। प० २१। पङ्क्ति० ५। श्लो० २६८। अ० वङ्गीयं। आ० कागजः। का०—?। स्था० कलिकाताराजश्रीयुतबाबुयतीन्द्रमोहनठाकुरः।

प्रा० वाक्यं। श्यामाम्भोरुहमध्यमण्डललसन्नाथाङ्कविद्योतनीं
रक्ताच्छादनधारिणीं नवदिवानाथप्रभारूपिणीं।
हस्ताभ्यामभयं वरं विदधतीमामन्दकन्दस्थलीं
वन्दे श्रीगुरुमङ्गनातनुमतीं तेजस्वतीं सन्ततं॥
यो जातः पृथिवीतले द्विजकुलश्रेष्ठतलतीनायके
राकानिर्म्मलशर्व्वरीपरिदृढः श्रीरामभद्रः कृती।

आद्याद्यागेवशैर्य्यवीर्य्यनिचयैर्मस्यां मचीयानसौ
विद्याभिः प्रतिवासरं कलुषितप्रत्यर्थिविद्वद्गणः ॥
न्यायाम्भःकरनामा सुविदितसुकृताम्भोधिभूकोणिपूर्ण-
प्रज्ञीवाह्वियामाकरकरनिकरो दिक्षु सर्व्वासु योऽयं ।
भट्टाचार्य्यः प्रसिद्धो निखिलजनपदे अङ्गकन्याप्रतीरे
नाम्नं सेव्रामराङ्घ्रिद्वयसरसिजवद्ध्यानधामैकबन्धुः ॥
रामैर्द्दैन्यद्दरौघद्दारणपटुर्यो भूमिनाकौकसां
ख्यातच चितिमण्डलेश्वरगणैः संसेविताङ्घ्रिद्वयः ।
ग्लानाऽयं क्रियतेऽखिलागममतं तस्य द्वितीयात्मज-
श्रीरामेश्वरशर्म्मणा सुविदुषा तन्त्रप्रमोदः शुभः ॥

समाप्तिवा०। रामेश्वरभूमिसुरक्षते तन्त्रप्रमोदके ।
सङ्क्षेपदीक्षणविधिः सप्तमः पटलो गतः ॥ समाप्तश्चायं ग्रन्थः ।

विषयः । १ कुण्डविनिर्णयः । २ युगादिनिर्णयः । ३ वह्निसंस्कारः । ४ होमविधानं ।
५ सङ्क्षेपहोमविधिः । ६ हवनीयवस्तुप्रमाणादिकथनं । ७ सङ्क्षेपदीक्षाविधिः ।

No. CCLXI.

Sarasvatí Tantra. Contents: 1, means for vitalising mantras; 2, Yoni mudrá, or mystic diagram of the female emblem; 3, the goddess Kulluka; 4, the purification of the great bridge, &c.; 5, purification of the mouth; 6, the Yoga of life.

२६१ । सरस्वतीतन्त्रं ।

ग्रन्थकारः ——? ।

विवरणं । नवीनमपरिशुद्धञ्च । प० ५ । पङ्क्ति० ७ । श्लो० १४० । आ० वर्त्तुलं । स्था०
चा० कागजः । का०—? । स्था० कलिकाताश्चत्रीयुतवाबुयतीन्द्रमोहनठाकुरः ।

प्रा० वाक्यं । मन्त्रार्थं मन्त्रचैतन्यं योनिमुद्रां न वेत्ति यः ।
शतकोटिजपेनापि तस्य विद्या न सिध्यति ॥
देवदेव महादेव इति यत् पूर्व्वसूचितं ।
एतत्सर्व्वं महादेव कृपया वद शङ्कर ॥

समाप्तिवा०। एतत्तन्त्रं गृहे यस्य तस्यावं सुरवन्दिते ।
तिष्ठामि नाच सन्देहो गोप्तव्यममरेष्वपि ॥ इति सरस्वतीतन्त्रे षष्ठः पटलः ।

विषयः । १ मन्त्रचैतन्यकथनं । २ योनिमुद्राकथनं । ३ कुल्लुकाकथनं । ४ महासेतु-
शुद्ध्यादिकथनं । ५ मुखशोधनविधानं । ६ प्राणयोगकथनं ।

No. CCLXII.

Siddhavidyá-dípiká. On the cult of Dakshṇá Káli, by S'aṅkara A'chárya, disciple of Jagannátha.

२६२ । सिद्धविद्यादीपिका ।

ग्रन्थकारः शङ्कराचार्य्यः ।

विवरणं । नवीनमपरिशुद्धञ्च । प० २७ । पङ्क्ति० ९ । श्लो० ९७२ । व० बङ्गीयं । आ० कागजः । का०—? स्था० कलिकाताख्यश्रीयुतबाबुयतीन्द्रमोहनठाकुरः ।

प्रा० वाक्यं । आपतसमस्तुषा च तुर्य्यतुर्य्यांपरां परां ।
महाप्रकाशसुभगां वन्दे तां षोडशीं कलां ॥
सर्व्वतन्त्रेन्द्रवेत्तारं सर्व्वागमविशारदं । जगन्नाथं गुरुं वन्दे शिवयोरैकविग्रहं ॥

समाप्तिवा० । भूचरखेचरसंयोगान्मूलाच्छक्तिं संशोध्य सेतुबन्धनमार्गेण पञ्चकारणत्यागाशाहा-श्रमः । इति सिद्धविद्यादीपिकायां नवमः पटलः समाप्तः ॥

विषयः । १, दक्षिणकालिकायाः कल्पः । २, तदीयपूजाविधिकथनं । ३, साधनविशेष-कथनं । ४, पुनः पूजाकथनं । ५, मन्त्रोद्धारकथनं । ६, ७, ८, पुरश्चरणविधानं । ९, नैमित्तिकानुष्ठानं ।

No. CCLXIII.

A'gamasára. A compilation, by Raghumaṇi, on Tantric mysteries.

२६३ । आगमसारः ।

ग्रन्थकारः रघुमणिः ।

विवरणं । नवीनमपरिशोधितञ्च । प० १०९ । पङ्क्ति० ७ । श्लो० १०५२ । व० बङ्गीयं । आ० कागजः । का०—? । स्था० कलिकाताख्यश्रीयुतबाबुयतीन्द्रमोहनठाकुरः ।

प्रा० वाक्यं । नमामि नागमस्तकञ्च शङ्खवत् करोज्ज्वलं ।
द्विजेकनिर्य्युतं वराभयापवर्ज्जितायतं ॥
समित्वरावशङ्करं नमोऽङ्गधामभाजनं ।
सवामभाककज्जलकं च वक्षपर्य्यनामकं ॥
नावधयुग्मदानद्रुतदक्षिततलसद्गुविषयविद्वतसमुपद्-
द्वारिद्राद्राविताशिद्रुमविश्वविलसत्सत्प्रतापैर्विमर्श्यः ।
न्यायालङ्कारविभिर्विविधबुधवरान्तदुर्बोधविद्या-
व्याख्यानाथप्रवृद्धिव्यथितदिविषद्राचार्य्यको रामभद्रः ॥

भट्टाचार्य्यस्य तस्य स्वगुणगणरविग्रामनेगास्यमाढ-
ध्वान्तः स्वान्तान्तरान्तर्न्द्रियविकृतिवशी यः सुतः सोऽत्र आसीत् ॥

समाप्तिवा०। प्रीणयेदनया स्तुत्या जगन्नाथं जगन्मयं ।
धर्म्मार्थकाममोक्षाणामाश्रये पुरुषोत्तमं ॥ इति विष्णुस्तोत्रं समाप्तं ॥

विषयः। तन्त्रशास्त्रोक्तविविधप्रकारस्तवरूपस्तवः।

No. CCLXIV.

Víjachintámaṇi Tantra. An original Tantra. Contents: 1, praise of the alphabet; 2, its origin; 3-4, mystic mantras—their derivation; 5, desirable objects; 6, 7, 8, vitalizing of mantras; 9, particular forms of meditation.

२६४। वीजचिन्तामणितन्त्रं।

ग्रन्थकारः —?

विवरणं। नवीनमपरिशोधितञ्च। प० १०। पङ्क्ति० ७। श्लो० १८०। व० वङ्गीयं।
आ० कागजः। का०—?। स्था० कलिकातानगरस्थयोगेन्द्रनाथयतीन्द्रमोहनठाकुरः।

प्रा० वाक्यं। श्रीपार्व्वत्युवाच। देवदेव महादेव नीलकण्ठ तपोधन।
शूलपाणे महाकाल कथ्यतां चन्द्रशेखर ॥
सर्व्वञ्च पूर्ब्बमीशान श्रुतं तव मुखात् प्रभो।
एवं पृच्छामि देवेश गुप्ततत्त्वं वृषध्वज ॥

समाप्तिवा०। स धनी स गुणी लोके स एव पुरुषोत्तमः।
स विष्णुः स च रुद्रः स्यात् स एव श्रीसदाशिवः ॥
इति वीजचिन्तामणितन्त्रे नवमः पटलः।

विषयः। १, वर्णप्रशंसा। २, वर्णतत्त्वकथनं। ३, वीजमन्त्रकथनं। ४, मन्त्रोद्धारकथनं।
५, साधनाकथनं। ६, ७, ८, मन्त्रचैतन्यनिरूपणं। ९, ध्यानविशेषकथनं।

No. CCLXV.

Kaivalya Tantra. Tantric secret observances. Contents: 1, praise of wine, (*madya*,) flesh, (*máṅsa*,) fish, (*mína*,) gesticulation, (*mudrá*,) female society, (*maithuna*,)—the five essentials of Tantric worship. These are technically called, from their initial letters, the five ms.,—*pancha makára*. 2-3, purification of the five essential ms.; 4, five great principles; 5, public homas.

२६५ । कैवल्यतन्त्रं ।

ग्रन्थकारः —?

विवरणं । नवीनमपरिशुद्धप्रायच । प० ७ । पङ्क्ति० ८ । श्लो० १२४ । ग० वङ्गीयं । आ० कागजः । का०—? । स्था० कलिकाताखश्रीयुतबाबुयतीन्द्रमोहनठाकुरः ।

प्रा० वाक्य । श्रीदेव्युवाच । देवदेव महादेव सृष्टिस्थित्यन्तकारक ।
श्रुतं बहुविधं देव समयाचारलक्षणं ॥
इदानीं श्रोतुमिच्छामि तेषां सारञ्च यत् प्रियं ।
कथयस्व महाबाहो यदि स्नेहोऽस्ति मां प्रति ॥

समाप्तिवा०। इति श्रुत्वा महादेवो हस्यमानः पुनः पुनः ।
दुर्गा दुर्गेति संस्तुत्य मूको भूत्वा स्थितस्तु ॥
इति कैवल्यतन्त्रे पञ्चमः पटलः ।

विषयः । १, महादिपञ्चमकारप्रशंसा । २, ३, पञ्चमकारशोधनं । ४, पञ्चतत्त्वशोधनं । ५, वाह्यहोमविधानं ।

No. CCLXVI.

Chintámaṇi Tantra. The MS. is incomplete; its contents are: 1, the six mystic circles; 2, the all-protecting charm; 3, Yoni-mudrá diagram; 4, meaning of mantras; 5, vitality of the meanings of mantras; 6, ditto of mantras relating to diagrams; 7, ditto of diagrams.

२६६ । चिन्तामणितन्त्रं ।

ग्रन्थकारः —?

विवरणं । नवीनमपरिशुद्धच । प० ११ । पङ्क्ति० ७ । श्लो० २१४ । ग० वङ्गीयं । आ० कागजः । का०—? स्था० कलिकाताखश्रीयुतबाबुयतीन्द्रमोहनठाकुरः ।

प्रा० वाक्यं । श्रीपार्वत्युवाच । देवदेव महादेव नीलकण्ठ तपोधन ।
शूलपाणे महादेव कथ्यतां चन्द्रशेखर ॥
सर्वं हि परमेशान श्रुतं तव मुखात् प्रभो ।
एकं पृच्छामि देवेश गुह्यतत्त्वं हृषध्वज ॥

समाप्तिवा०। खण्डितं ।

विषयः । १, षट्चक्राधिकरणकयोगिरूपचिन्ताविधिः । २, त्रैलोक्यमङ्गलकवचं । ३, योनिमुद्रानिरूपणं । ४, मन्त्रार्थनिरूपणं । ५, मन्त्रार्थचैतन्यनिरूपणं । ६, मुद्रामन्त्रार्थचैतन्यं । ७, मुद्रार्थचैतन्यं । एवं सप्तपटलाः सन्ति ।

No. CCLXVII.

Syámákalpalatá. A work of the Tantra class, by Rámacharaṇa. Contents: 1, praise of the Deví; 2, initiation; 3, diurnal worship; 4, hymn to Syámá; 5, charms; 6, exercise in the mantra; 7-8, particular forms of worship; 9, secret worship; 10, different forms of reflection &c.; 11, homa.

२६७। श्यामाकल्पलता।

ग्रन्थकारः रामचरणः।

विवरणं। नवीनमपरिष्कृतञ्च। प० १०८। पङ्क्ति० ७—८। श्लो० २२४०। अ० वङ्गीयं।
वा० कामजः। का०—?। स्था० कलिकातास्थश्रीयुतबाबुयतीन्द्रमोहनठाकुरः।

आ० भागः। श्यामातीतोऽपि संवित् स्फुरति च तदपत्यापि निर्वेकहेतु-
र्विश्वात्मा बुद्धिचेतःप्रकृतिमहदहङ्कारमायास्वरूपा।
सर्वात्मा सर्वधामा प्रकृतिरिति परा गीयते वेदविद्भिः।
संसाराधाराऽस्तु तस्यै जगतिमिरभिदे सर्वभूत्यै नमोऽस्तु॥
अज्ञानध्वान्तसंघाय चित्तवैरञ्चकारमूले।
हीनपापकृपापाङ्गे श्रीकृष्णाय नमो नमः॥
देवीं दुर्दरदैत्यदर्पदलनीं नत्वा शिरःपङ्कजे
धृत्वा श्रीगुरुपादपङ्कजरजो श्यामां गुरूणां मतं।
तेषामाचरणञ्च तन्त्रनिचयालोक्य यत्नादिमां
श्यामाकल्पलतां सतां वितनुते मोदाय रामः सुधीः॥

समाप्तिभा०। खण्डितं।

विषयः। १, विद्यामाहात्म्यनिरूपणं। २, दीक्षाप्रकरणोपदेशः। ३, नित्यपूजाप्रमाणं। ४, श्यामास्तवप्रकाशः। ५, कवचप्रकाशः। ६, पुरश्चरणविधिः। ७—८, साधनविशेषकथनं। ९, रहस्यसाधनविधिः। १०, भावादिनिर्णयः। ११, होमविधानं। एवं एकादशस्तवकाः सन्ति॥

No. CCLXVIII.

Víra Tantra. This work is said to be an original Tantra treating of the whole S'ákta cult. The MS. examined is imperfect and contains only charms for bringing persons under control; for bewitching, paralyzing, and making them of unsettled mind; for appeasing malevolent influences, &c.

२६८। वीरतन्त्रं।

ग्रन्थकारः ——?

विवरणं। नवीनमपरिशुद्धञ्च। प० ९। पङ्क्ति० ८। श्लो० ४१०। अ० वङ्गीयं। आ० कागजः। का०—?। स्था० कलिकातास्थश्रीयुतबाबुयतीन्द्रमोहनठाकुरः।

प्रा० वाक्यं। उड्डीशे च समाकीर्णे योगिवृन्दसमाकुले।

प्रणम्य शिरसा गौरी परिपृच्छति शङ्करं॥

विशेषेण तु तत्सर्व्वं कथयस्व प्रभो मम।

अन्येऽपि विविधाः कार्य्या (?) मन्त्रांश्च ब्रूहि भैरव॥

समाप्तिवा०। खण्डितं।

विषयः। वशीकरणोच्चाटनमोहनस्तम्भनशान्तिकपौष्टिकादिविविधोपायकथनं।

No. CCLXIX.

A'gama Chandriká. A Tantric compilation, by Rámakrishna, on initiation, bathing, worship of different divinities, diagrams, &c. The MS. examined is incomplete.

२६९। आगमचन्द्रिका।

ग्रन्थकारः रामकृष्णः।

विवरणं। नवीनमपरिशुद्धञ्च। प० ४१। पङ्क्ति० ७। श्लो० १५२५। अ० वङ्गीयं। आ० कागजः। का०—?। स्था० कलिकातास्थश्रीयुतबाबुयतीन्द्रमोहनठाकुरः।

प्रा० वाक्यं। प्रणम्य गुरुपादाब्जं मुनिवेदशरे शके।

श्रीरामकृष्णः सङ्क्षिप्य तनोत्यागमचन्द्रिकां॥

मातोत्पया तन्त्रविलासं सम्प्रपञ्चमुपलक्ष्य प्रपञ्चं कालानुरूपं सानसवस्त्वविकलं (?)

प्रत्यवाग्भीतानुरागाय किञ्चिदत्र लिखति॥

समाप्तिवा०। खण्डितं।

विषयः। दीक्षाविधिस्नानसर्व्वदेवपूजाविविधचक्रादिनिरूपणं।

No. CCLXX.

Kaulikárchana-dípiká, alias *Kula-dípiká.* The religious duties of the Kaulas. By Jagadánanda.

२७० । कौलिकार्चनदीपिका ।

ग्रन्थकारः जगदानन्दः ।

विवरणं । नवीनमपरिशुद्धञ्च । प० ६१ । पङ्क्ति० ८ । श्लो० १८६० । च० वङ्गीयं । आ० कागजः । का०—? । स्था० कलिकाताराजधानीयुतबाबुयतीन्द्रमोहनठाकुरः ।

प्रा० वाक्यं । नत्वा विश्वेश्वरं भक्त्या जगदानन्दशर्म्मणा ।
प्रोच्यते कौलिकप्रीत्यै कौलिकार्चनदीपिका ॥
तत्र कुलार्चने कुलागमादिदर्शितन्तेषु नत्वादिद्राजसावश्यकत्वमाह, यथेति ।

समाप्तिवा० । एवं शेषं पुरा कृत्वा इत्येतयोर्मन्त्रयोरेकतमेनाभिषिञ्चेदित्यभिषेकविधिः ।
सन्त्येतानि बहूनि साधकानां हिताय तेषां कुलसाधकानां ।
तन्त्राण्यनेकानि विलोक्य यत्नात् प्रकाशिता सा कुलदीपिकेयं ॥
यद्यपि त्वया चात्र विमूढबुद्ध्या ह्यशोकतं गुह्यतरं सुगुप्तं ।
कुर्मोऽप्यनेनात् खलु साधकानां प्रयाति घोरं नरकं प्रकामात् ॥
नभोऽब्धेमाश्विचन्द्राब्दे कार्त्ते चैवे सितेतरे ।
जगदानन्दशर्म्मेण कृतैषा कुलदीपिका ॥

विषयः । कुलधर्म्मप्रशंसादिबहुविधकौलिकाचारादिनिरूपणं ।

No. CCLXXI.

Yuktikalpataru. A compilation by Bhoja Narapati. It treats of jewels, swords, horses, elephants, ornaments, flags, umbrellas, seats, ministers, army, horses, boats, &c. and frequently quotes from an author of the name of Bhoja *(bhojepi)*, meaning probably Bhoja Rájá of Dhárá.

२७१ । युक्तिकल्पतरुः ।

ग्रन्थकारः भोजराजः ।

विवरणं । नवीनमपरिशुद्धञ्च । प० ७१ । पङ्क्ति० ७ । श्लो० २०११ । च० वङ्गीयं । आ० कागजः । का०—? । स्था० कलिकाताराजधानीयुतबाबुयतीन्द्रमोहनठाकुरः ।

प्रा० वाक्यं । विश्वसर्गविधौ वेधा यत्नाम्नाजपति यो विभुः ।
तदत्ययविधायोऽयं वन्दे परमेश्वरं ॥
कं वा नन्दनकुर्व्वाणः कंसानन्दं करोति यः ।
तं देवनन्दैरादाधनमाराध्यमवं भजे ॥
जयन्ति शास्त्रकर्त्तारो वरपाणि मुहुर्मुहुः ।
येषां वाचः पारयन्ति नवधैवेव सज्जनान् ॥

नानामुनिनिबन्धानां सारमाहृत्य यत्नतः।
तनुते भोजभूपतिर्युक्तिकल्पतरुं मुदे॥

समाप्तिवा०। यानं यत् यद्युक्तिहेतवेयानं तदुच्यते।
अम्बुभिः वर्णिते यानं अम्बुयानं प्रचक्षते॥
नाडभ्यां वारि * * * * अन्येषु न निर्णयः।
इति युक्तिकल्पतरौ निम्मह्यानोद्देशः।

विषयः। अमात्यादिबलयानयात्राविमपदुतकपर्दैवद्यतन्त्रिनीतियुक्तिः दुर्गयुक्तिः नगरीयुक्तिः वास्तुयुक्तिः राजगृहयुक्तिः गृहयुक्तिः आसनयुक्तिः छत्रयुक्तिः ध्वजयुक्तिः उपकरणयुक्तिः अलङ्कारयुक्तिः हीरकपरीक्षा विद्रुमपरीक्षा प्रवालपरीक्षा मुक्तापरीक्षा वैदूर्यपरीक्षा इन्द्रनीलपरीक्षा मरकतपरीक्षा कृत्रिमाकृत्रिमपरीक्षा कर्कतनपरीक्षा भीष्ममणिपरीक्षा रुधिराक्षपरीक्षा स्फटिकपरीक्षा खड्गपरीक्षा गजादिपरीक्षाद्यो विविधा उपाया वर्णने।

No. CCLXXII.

Sárasañgraha. On stellar conjunctions, mourning, expiations, lunar days, &c. By Chandras'ekhara Vachaspati.

२७२। सारसङ्ग्रहः।

ग्रन्थकारः चन्द्रशेखरवाचस्पतिः।

विवरणं। नवीनभूर्जपत्रियग्रन्थ। प० १०२। पङ्क्ति० ६। श्लो० २०००। अ० बङ्गीयं। आ० कागजः। का०—?। स्था० कलिकाताराजश्रीयुतबाबुयतीन्द्रमोहनठाकुरः।

प्रा० वाक्यं। शिवं नत्वा कृते सारे क्रियते सारसङ्ग्रहः। श्रीवाचस्पतिधीरेण वैधकृत्यप्रवर्तने॥
अथ कालस्य तत्र संवत्सरश्चान्द्रः सौरः सावनो नाक्षत्रश्चेति चतुर्विधः।

समाप्तिवा०। अयोनौ गोयोनौ अन्यत्र वा मैथुने देवी वाप इत्यस्य जपः प्राणायामशतं वा इति।

विषयः। सङ्क्रान्त्याशौचप्रायश्चित्तादितिथ्यादिव्यवस्था।

No. CCLXX...

Vais'vadevádi-mantra-vyákhyá. Object of the mantras for the performance of sráddha, &c.

२७३ । वैश्वदेवादिमन्त्रव्याख्या ।

ग्रन्थकारः ——?

विवरणं। प्राचीनमपरिशुद्धच । प० २७ । पङ्क्ति० ६ । श्लो० २०० । अ० वङ्गीयं । आ० कागजः । का०—? । स्था० कलिकातास्थश्रीयुतबाबुयतीन्द्रमोहनठाकुरः ।

प्रा० वाक्यं । अग्नये स्वाहा इति सुगमं । देव के अग्रे इति गम्यं देवे देवकर्म्मणि हुतस्य एनस्य पापस्य अवयजनं नाशनमसि ।

समाप्तिवा० ——?

विषयः । श्राद्धादिमन्त्रप्रतिमाथार्थविवरणं ।

No. CCLXXIV.

Vrihannirvána Tantra. An original Tantra. Contents, 1, origin of the universe; 2, the mundane creation; 3, praise of the female energy; 4 ; 5, 6, 7, 8, Goloka and other celestial regions; 9, the lotus of knowledge; 10, the upper part thereof; 11, knowledge of the Tantras; 12, Tantras appropriate to the Vaishnavas; 13, praise of the Brahma whose name is formed of ten syllables; 14, characteristics of the *avadhuta* hermit.

२७४ । वृहन्निर्वाणतन्त्रं ।

ग्रन्थकारः ——— ?

विवरणं। प्राचीनमपरिशुद्धच । प० २९ । पङ्क्ति० ७—८ । श्लो०१९ । अ० वङ्गीयं । आ० कागजः । का० ? शकाब्दाः १७२४ । स्था० कलिकातास्थश्रीयुतबाबुयतीन्द्र० मोहनठाकुरः ।

प्रा० वाक्यं । कैलासपर्व्वते रम्ये नानारत्नोपशोभिते ।
विपरीतरतासक्ता चण्डी पप्रच्छ शङ्करं ॥
श्रीचण्डिकोवाच । निराकारं निर्गुणच स्तुतिनिन्दाविवर्जितं ।
अनित्यं सर्व्वकर्त्तारं वर्णातीतं सुनिश्चितं ॥

समाप्तिवा०। इति मे कथितं कान्ते चतुराश्रमलक्षणं ।
न वक्तव्यं परोऽन्ये प्राणान्तेऽपि महेश्वरि ॥
इति श्रीवृहन्निर्वाणतन्त्रे चण्डिकाशङ्करसंवादे चतुराश्रमवर्णनं नाम चतुर्दशः पटलः ॥

विषयः। १, प्रश्नाख्यकथनं। २, वहिर्निरूपणं। ३, प्रकृतिप्रशंसा। ४. पञ्चाशाबध्यादिकथनं। ५. ६, ७, ८, गोशौकादिकथनं। ९. ग्रामपद्मकथनं। १०, प्रोज्ञपद्मयोर्द्वैमविवरणं। ११. तवज्ञानकथनं। १२, वैष्णवतत्त्वकथनं। १३, दुग्धाश्वरमन्त्रमाहात्म्यं। १४, अवधूतलक्षणकथनं॥

CCLXXV.

Dvaitanirṇaya.—Dissertations, by Váchaspati Mis'ra, on disputed questions of Smṛiti, such as, bathing, duties during eclipses, when they extend from day to night, or night to day, adoption, intercalary months, shedding of the hair of the head near sacred streams, &c.

२७५। द्वैतनिर्णयः।

ग्रन्थकारः वाचस्पतिमिश्रः।

विवरणं। नवीनमपरिशुद्धञ्च। प० १०२। पङ्क्ति० ७। श्लो० २५००। अ० वङ्गीयं। आ० कागजः। का०—?। स्था० कलिकातास्थश्रीयुतबाबुयतीन्द्रमोहनठाकुरः।

प्रा० वाक्यं। आभीरदारकमुदश्चितकिङ्किणीकमातामपाणिचरणं पुरुषं पुराणं।
मञ्जीरमञ्जुमणिधरमञ्जुजाघमद्वैतचिन्मयमनादिमनन्तमीडे॥
सरत्तुलितसागरं व्यधित यो नृपग्रामणीर्भैरवविजितकामिनेरहित यत्नलाद्दूषणान्।
स एव नृपभैरवः समरसीम्नि पञ्चाननो जयत्यरिविदारको जगति राजचन्द्रात्मजः॥
अयं वापि नामामतोतः कवीनां गुणैर्दोःप्रतापात्मनीतो भटानाम्।
त्रिलोकोपतिः श्रेयसी वासभूमिः पुनीते जगन्मण्डलं राजचन्द्रः॥
सत्यभामेव कृष्णस्य गौरीव मदनद्विषः।
सविशेषा जयत्येषा नृपभैरवभामिनी॥
विष्णोध्वक्षः पुरमिव शम्भोरिव देहवामार्द्धं।
देवी सभाभिरेषा जयति जयात्मा महादेवी॥
एषा विदितविशेषा प्रसवाद्यं वीक्ष्यते जगज्जननी।
तदुपरि परितः प्रपतति पाण्डवघोरकमयी दृष्टिः।
श्रीभैरवेश्वरक्षोणीपतिधर्म्मपत्नी राजाधिराजपुरुषोत्तमदेवमाता।
वाचस्पतिं निखिलतन्त्रविदं नियुज्य द्वैते विनिर्णयविधिं विधिवत्तनोति॥

समाप्तिवा०। मेषादावभ्यसमये सम्पिण्डकसकृत्पर्वं। शुभयुक्तं प्रशंसन्ति तद्दालोकितमेव वा॥
इति महामहोपाध्यायमिश्रवाचस्पतिविरचितो द्वैतनिर्णयः समाप्तः।

विषयः। १, स्नानादिद्वैतनिर्णयः। २, इन्द्रियवशविचारः। ३, दत्तकपुत्रविधानं। ४, अधिमासादिविचारः। ५, तीर्थमुण्डनादिविचारादिविविधसन्दिग्धार्थविनिर्णयो वर्ण्यते।

CCLXXVI.

Sañskára-vádártha.—A Smṛiti compilation on essential sacraments or sañskáras.

२७६। संस्कारवादार्थः।

ग्रन्थकारः—?

विवरणं। प्राचीनमपरिशुद्धञ्च। प० ५। पङ्क्तिः ७। श्लो० १८०। अ० वङ्गीयं। आ० कागजः। का०—?। स्था० कलिकाताख्यश्रीयुतबाबुयतीन्द्रमोहनठाकुरः।

प्रा० वाक्यं। ननु जातकर्म्मादिसंस्काराणां यथाकालाकरणे उपनयनकाले प्राप्ते प्रायश्चित्तं कृत्वा करणं तत्र बाध एवेति संशयः।

समाप्तिवा०। खण्डितं।

विषयः। जातकर्म्मादिसंस्काराणां कर्णवेधसमयादिविचारः।

CCLXXVII.

Kálanirṇaya.—On proper times for the performance of religious rites. By Gopála Nyáya-panchánana.

२७७। कालनिर्णयः।

ग्रन्थकारः गोपालन्यायपञ्चाननः।

विवरणं। प्राचीनमपरिशुद्धञ्च। प० ४२। पङ्क्तिः ६। श्लो० ५००। अ० वङ्गीयं। आ० कागजः। का०—?। स्था० कलिकाताख्यश्रीयुतबाबुयतीन्द्रमोहनठाकुरः।

प्रा० वाक्यं। कस्मिन् कर्म्मणि कः कालो नैव कालः कदा तयोः।
विलोक्य मुनिवाक्यानि निर्णयोऽत्र निगद्यते॥

समाप्तिवा०। एकस्मिन्नेव वर्षे तु द्वौ मासावधिमासकौ। प्रकृतस्तत्र पूर्व्वः स्यादधिमासस्तथोत्तरः॥ इति जाबालवचनाच्च परोऽधिमास इत्याहुः। इति मलमासकालनिर्णयः सम्पूर्णः।

विषयः। १, कार्य्यविशेषप्रतिपादकसमयनिरूपणं। २, मलमासादिकालनिरूपणञ्च।

CCLXXVIII.

Dánaságara.—A compilation, in 70 sections, on the advantages of various kinds of gifts, and their consecration. The author of this treatise was Rájá Vallála Sena of Bengal. He calls himself the son of Vijaya Sena, and grandson of Hemanta Sena. According to the author of the *Samaya Prakás'a*, the work was completed in the S'aka year 1019, = A. D. 1097. *Vide* Journal As. Soc. Bengal, XXXIV. pt. i. p. 137.

२७८ । दानसागरः ।

ग्रन्थकारः वल्लालसेनः ।

विवरणं । नवीनप्रायमपरिशोधितञ्च । प० २२९ । पङ्क्ति० ८ । श्लो० ४५०० । अ० वङ्गीय । आ० कागजः । का० शकाब्दाः १७२८ । स्था० कलिकाताख्यश्रीयुतबाबुयतीन्द्रमोहनठाकुरः ।

प्रा० भागं । ये साक्षादवनीतलावतभुजो वर्णाश्रमव्यापृता
येषां पाणिषु निःक्षिपन्ति कृतिनः पात्रे * * * * * ।
* * * * * * नियमगुरुवचनचारित्रचर्या-
मर्थाद्यागोच *नः कलिचकितसदाचारसञ्चारसीमा ॥

समाप्तिवा० । श्रीवल्लालनरेन्द्रवर्णितमसुं सर्व्वानुसम्पत्प्रतिदानसागरमधिदैकपाईजनाः ।
इति परमेश्वरपरममाहेश्वरमहाराजाधिराजनिःशङ्कशङ्करश्रीमद्वल्लालसेनदेवविरचितः श्रीदानसागरः समाप्तः ।

विषयः । ब्राह्मणप्रशंसा । दानप्रशंसा । पात्रप्रशंसा । सात्त्विकराजसतामसदानफलं । तुलापुरुषदानादिनिरूपणं । धान्याचलादिदानं । गोदानादिविविधदानफलकथनं च । प्रयोगश्च ।

CCLXXIX.

Nirṇayámṛita.—A Smṛiti treatise on obligatory diurnal duties. By Súrya Sena.

२७९ । निर्णयामृतं ।

ग्रन्थकारः सूर्य्यसेनः ।

विवरणं । प्राचीनमपरिशुद्धञ्च । प० १८ । पङ्क्ति० ६ । श्लो० ७०० । अ० वङ्गीयं । आ० कागजः । का०—? । स्था० कलिकाताख्यश्रीयुतबाबुयतीन्द्रमोहनठाकुरः ।

प्रा० वाक्यं। कारणमेकं जगतां वारणमात्रेण वारणं विपदां।
किमपि महामहनीयं प्रत्यूहव्यूहदारणं वन्दे।
भावयामि हृदभक्तिभावनीं भाविताङ्घ्रियुगलां सुमङ्गलां।
इष्टदां सततमिष्टदेवतामन्त्रतत्त्वकलमन्त्रमातरं।

समाप्तिवा०। खण्डितत्वेन शेषवाक्यं नास्ति।

विषयः। १, तिथ्यादितत्कर्त्तव्यकर्म्मनिर्णयः।

CCLXXX.

Varṇabhairava.—On the origin, forms, and merits of the letters of the Sanskrit alphabet. By Rámagopála Pañchánana, son of Rámanátha, grandson of Náráyaṇa.

२८०। वर्णभैरवः।

ग्रन्थकारः रामगोपालपञ्चाननः।

विवरणं। प्राचीनं परिशुद्धप्रायञ्च। प० १२। पङ्क्ति० ७। श्लो० २९०। अ० वङ्गीयं। आ० कागजः। का०—?। स्था० कलिकातास्थश्रीयुतबाबुयतीन्द्रमोहनठाकुरः।

प्रा० वाक्यं। सहस्रच्छदाम्भोजमध्योपविष्टं नितान्तप्रशान्तं सदाशक्तियुक्तं।
श्रिया युक्तमीडे गुरुं सुप्रसन्नं गिरीशं स्फुरद्धंसमीडे निषण्णं॥
यामलादीनि तन्त्राणि समालोक्य बहूनि च।
नानामुनिनिबन्धांश्च तथा सम्पूर्णसंहितां॥
साधकानां मतं ज्ञात्वा स्वयं युक्त्या निरूप्य च।
मन्त्राणां तत्त्वसङ्गत्यै रामगोपालशर्म्मणा॥
साधकानां तथा प्रीत्यै वर्णभैरव उच्यते।

समाप्तिवा०। विलोक्य नानातन्त्राणि ज्ञालेश्वरमतानि च।
अकारादिक्षकारान्तः वर्णभैरव ईरितः॥
यदत्र लिखितं भ्रान्त्या तद्दोषः क्षम्यतामुमे।
शक्नोति कथितुं को वा वागवैदग्ध्यं महेश्वितुः॥
विख्यातः कविराजमिश्रधरणीगोर्ब्वाणवाचस्पति-
र्यागीशस्तनुजस्तदीयगुणयुक् षट्तर्कविद्यापतिः॥
आचार्य्योजनि तत्सुतः श्रुतिगुरुलङ्काद्यादिनारायण-
स्तद्वीरात्मजराममाथतनयस्यैषा कृती राजते॥

विषयः। १, शब्दोत्पत्तिकथनं। २, अकारादिप्रत्येकवर्णानां माहात्म्यकथनं॥

CCLXXXI.

S'rítattvabodhiní.—A compilation, by Krishnánanda, embracing the whole of the S'ákta cult. The MS. is incomplete and contains only 15 chapters.

२८१ । श्रीतत्त्वबोधिनी ।

ग्रन्थकारः कृष्णानन्दः ।

विवरणं । प्राचीनं परिशुद्धप्रायञ्च । प० २१५ । पङ्क्ति० ९ । श्लो० ६५०० । अ० वङ्गीयं । आ० कागजः । का०—? । स्था० कलिकाताराजधानी श्रीयुतवाबुयतीन्द्रमोहनठाकुरः ।

प्रा० वाक्यं । श्रीनाथाङ्घ्रिसरोरुहं प्रतिदिनं सञ्चिन्त्य मुक्तिप्रदं
नानातन्त्रमतं विविच्य विदुषां श्रीनाथवक्त्रान्मुदा ।
सारं तेषु निगूढमाहृतवता ज्ञात्वा मया श्रीमता
कृष्णानन्दविदित्सुना विरचिता श्रीतत्त्वबोधिन्यपि ॥

समाप्तवा० । खण्डितं ।

विषयः । १, कल्पे गुरुस्तोत्रकवचादिकथनं । २, नित्यकर्मानुष्ठानपूजादिकथनं । ३, शिवपूजाविधानं । ४, पूजाधारादिन्यासविवरणं । ५, साधारणपूजाकथनं । ६, जपरहस्यकथनं । ७, पञ्चाङ्गपुरश्चरणकथनं । ८, ग्रहणपुरश्चरणादिविवरणं । ९—१०, होमविवरणं । ११, कुमारीपूजादिकथनं । १२, षट्चक्रविधिकथनं । १३, शान्तिवश्यादिषट्कर्मकथनं । १४, शान्तिकल्पविधानं । १५, आथर्वणोक्तज्वरशान्तिकथनं । एवं पञ्चदशपटलाः सन्ति ।

CCLXXXII.

Yoginíhridaya.—This MS. is also incomplete. Its contents are, 1, hints regarding magic circles; 2, hints regarding mantras; 3, hints about the mode of worshipping the Deví; 4, derivation of mantras; 5, time meet for initiation; 6, how to become a *víra*, or one who can worship with spirituous liquors.

२८२ । योगिनीहृदयं ।

ग्रन्थकारः—?

विवरणं । नवीनमपरिशुद्धञ्च । प० २७ । पङ्क्ति० ७ । श्लो० ५०० । अ० वङ्गीयं । आ० कागजः । का०—? । स्था० कलिकाताराजधानी श्रीयुतवाबुयतीन्द्रमोहनठाकुरः ।

प्रा० वाक्यं। श्रीदेव्युवाच। देवदेव महादेव परिपूर्णप्रथामय।
वामकेश्वरतन्त्रेऽस्मिन्नज्ञातार्थास्त्वनेकशः।
तांस्तानर्थानशेषेण वक्तुमर्हसि शङ्कर॥
श्रीभैरव उवाच। शृणु देवि महागुह्यं योगिनीहृदयं परं॥
त्वत्प्रीत्या कथयाम्यद्य गोपितव्यं विशेषतः॥

समाप्तिवा०। खण्डितं।

विषयः। १, पटले श्रीचक्रसङ्केतकथनं। २, मन्त्रसङ्केतकथनं। ३, पूजासङ्केतकथनं।
४, मन्त्रोद्धारकथनं। ५, दीक्षाकालविनिर्णयादिकथनं॥ ६ वीरसाधनकथनं।
एवं षट् पटला वर्णिताः।

CCLXXXIII.

Yoginthṛidaya-dípiká.—A commentary on No. CCLXXXII, by Amṛitánanda.

२८३। योगिनीहृदयदीपिका।

ग्रन्थकारः अमृतानन्दः।

विवरणं। नवीनमलपरिग्राहकम्। प० ५३। पङ्क्ति० १०। श्लो० १५००। अ० वङ्गीयं। आ०
कागजः। का०—?। स्था० कलिकातास्थश्रीयुतबाबुयतीन्द्रमोहनठाकुरः।

प्रा० वाक्यं। अगद्वन्द्यावेतौ गणपवटुकौ विघ्नविमुतौ
अगद्व्याप्तौ तौ जपनिरतसाचित्यवरदौ।
रथाग्रेस * * रविशशिशमानूक्षदृशौ
मयि स्यातां रक्षापरवशधियौ सद्गुरुमयौ॥

समाप्तिवा०। खण्डितं।

विषयः। १, योगिनीहृदयतात्पर्य्यार्थविवरणं।

CCLXXXIV.

Táráprádípa.—A Tantra compilation by Lakshmaṇa Des'ika.

२८४। ताराप्रदीपः।

ग्रन्थकारः लक्ष्मणदेशिकः।

विवरणं। नवीनमलपरिग्राहकम्। प० ३४। पङ्क्ति० ७। श्लो० ६००। अ० वङ्गीयं। आ०
कागजः। का०—?। स्था० कलिकातास्थश्रीयुतबाबुयतीन्द्रमोहनठाकुरः।

शा॰ वाक्यं। पञ्चाशद्वर्णवेद्या सकलगुणमयो पादपिङ्गूपधारी
व्यापी सत्ताविधाता परमगुरुतरो निष्कलो निर्विकारः।
आधारे लिङ्गनाभौ हृदि गलवदने भालदेशे सभावे-
ष्वाप्तं यो रामभद्रः स जयति नितरां योगिनां ध्यानगम्यः॥
नत्वा भेदाब्धिपारं द्विजकुलतिलकं व्यासदेवं विधाने-
र्लोकानां धर्महेतौ कलिभवविभवे तारणार्थं प्रयत्नात्।
स्वच्छं संसारभूतं विविधजनहितं मन्त्रतन्त्रातिगुह्यं
व्याचष्टे भव्यमूर्त्तिर्ष्वरजयनविधौ शास्त्रमेतत्समस्मात्॥
श्रीमज्जगद्दीश्रिको निजगुरोः पादाब्जमेवाश्रयात्
व्याचष्टे जनरोचनाय विधिना शास्त्रं प्रमोदप्रदं।
केचित्त्वागममन्त्रतन्त्रनिपुणाः कौटिल्यमोहाहता-
स्तेषां वामदिमार्गमोचनधिया ताराप्रदीपं शुभं॥

समाप्तिवा॰। खण्डितत्वेन शेषवाक्यं नास्ति।

विषयः। १. पटले गुरुशिष्यादिलक्षणं। २, पूजास्नानादिकथनं। ३, तारामहाविद्याया-
अयोदशावाक्षरमहामूर्त्तिकथनं। ४, मारणोच्चाटनादिवश्यविधेपायकथनं।
५, मन्त्रसाधनप्रभेदकथनं। एवं पञ्च पटलाः सन्ति।

CCLXXXV.

Niruttara Tantra.—An original Tantra, attributed to Maháděva. Contents: 1, praise of Dakshiṇá Kálí; 2, the cult of that divinity; 3, charms, bearing her name; 4, purifications necessary for her worship; 5-6, the mode of worshipping her at night; 7-8, bathing her image for worship; 9, attainment of power over her mantra; 10, differences of the various forms of S'akti; 11, form of adoration appropriate for *Yogis;* 12, another form; 13, adoration of Siddha Vídyá, a form of S'akti; 14, characteristics of courtezans who may be engaged for the Kaula form of worship; 15, purifications of wine, flesh, meat, fish, gesticulation and female society, or the five essentials of Kaula worship.

२८५। निरुत्तरतन्त्रं।

ग्रन्थकारः——?

विवरणं। प्राचीनप्रायं परिशुद्धञ्च। प॰ १०८। पङ्क्ति॰ ४। श्लो॰ २०००। आ॰ वर्त्तुलीयं।
आ॰ कागजः। का॰—?। स्था॰ कलिकातास्थश्रीयुतबाबुयतीन्द्रमोहनठाकुरः।

प्रा० वाक्यं। सिद्धविद्या पुरा प्रोक्ता मन्त्रयन्त्रादिकानि च।
नानाभावप्रभेदेन संस्कारो जायते प्रभो ॥
भावभेदेन कथय लोकनिस्तारकारक।
सर्व्वेषां प्ररणं तन्त्रसिद्धान्तं विष्णुसमतं ॥
नानाभावना येन भावेन परिज्ञायते।
चारुतीर्थां वा प्रकृतिः कापि तस्या वा कीदृशी क्रिया ॥
तत्प्रकाशाय सम्प्रन्न मे येन यामि निस्तरं।

समाप्तिवा०। न वारतिथिनक्षत्रं न योगकरणं तथा।
सिद्धविद्या महाविद्या युक्तेवा प्रकीर्त्तिता ॥
इति श्रीनिस्तारतन्त्रे पार्व्वतीशिवसंवादे पञ्चदशः पटलः।

विषयः। १ देवीकर्तृकयावदीयप्रश्नोत्तरकरणात् देव्या निस्तारणेन निस्तारतन्त्रेति समाख्या यौगिकी। अत्र १५ पटला वर्णन्ते।
१, सङ्क्षेपेण दक्षिणकालिकाया माहात्म्यकथनं। २, दक्षिणकालिकायाः पूजाप्रकारसङ्क्षेपकथनं। ३, तस्याः कवचं। ४, तदीयपुरश्चरणविधानं। ५—६, रजनीदेव्याः पूजनादिकथनं। ७, दक्षिणकालिकाया अभिषेककथनं। ८, पुनस्तदीयाभिषेकादिकथनं। ९, मन्त्रसिद्धिप्रकारकथनं। १०, शक्तिप्रभेदकथनं। ११, योगिनां साधनविशेषविधानं। १२, साधनान्तरकथनं। १३, सिद्धविद्यासाधनोपयोगिशक्तिविशेषप्रतिपादनं। १४, कौलसाधनानुकूलवेशमात्रशक्तेः प्रभेदप्रतिपादनं। १५, मद्यमांसमीनमुद्रामैथुनाख्यपञ्चमकाराद्यादिकथनं।

CCLXXXVI.

Jnánánanda-taranginí.—A Tantra compilation by S'iromaṇi. The MS. is incomplete, containing only the first seven chapters and a portion of the 8th. The subject is the cult of the Deví and of her different manifestations. One chapter is devoted to prove that the Durgá pujá is founded upon unquestionable authorities.

२८६। ज्ञानानन्दतरङ्गिणी।

ग्रन्थकारः शिरोमणिः।

विवरणं। नवीनं परिमाणप्रायम्। प० १३०। पङ्क्ति० ८। श्लो० २०००। च० मङ्गीयं। ला० कालज्ञः? का०—?। स्था० कालिकाताख्यनौपुत्रवाबुयतीन्द्रमोहनठाकुरः।

प्रा० वाक्यं। भक्तिपूर्वं प्रियं मत्वा शिरोमणिरिहाङ्गना।
चतुर्थश्चतुरश्चैव प्राणानन्दतरङ्गिणी॥
चाद्ये.च शिवशाक्तश्च नानातन्त्रे यथोदितं।
प्रकाश्यते मया यत्नात् साधकार्थसिद्धये॥

समाप्तिवा०। खण्डितं।

विषयः। १ परिच्छेदे गुरुशिष्यलक्षणाक्षमालाचालनप्रभेदमालासंस्कारादयः। २, पुरश्चरणयोनिमुद्राविधानादिमन्त्रपुरश्चरणं। ३, मन्त्रविद्याविवेचनं। ४, मन्त्रस्था-नविनिर्णयः, दुर्गोत्सवप्रमाणञ्च। ५, सर्वतोभद्रमण्डलकथनं। ६, दीक्षा-विधानं, सामान्यपूजाविधानञ्च। ७, नायिकादिपूजाविधिः। ८, मन्त्रोद्धार-कथनं। एवं विषयं संरचिता अष्टपरिच्छेदा वर्त्तन्ते।

No. CCLXXXVII.

Váráhi Tantra. A Vaishṇava Tantra attributed to Kṛishṇa. Contents: 1, dialogue between Kṛishṇa and Rádhiká on their birth and sojourn among the Gopa tribe; 2, description of Brahma stones and Brahma Líṅgas; 3, sacred places, where perfection may be attained; 4, places with five sacred pools; 5-6, the Mahádeva of Chandrás'ekhara, a place of pilgrimage in Chittagong; 7, the Champaka forest, and other places of pilgrimage; 8, merits of reading hymns to Chaṇḍí, wearing charms bearing her name, &c.

२८७। वाराहीतन्त्रं।

ग्रन्थकारः श्रीकृष्णः।

विवरणं। नवीनं परिशुद्धप्रायञ्च। प० १७। पङ्क्ति० ८। श्लो० ५००। अ० नागरं। का० कागजः। का०—?। स्था० कलिकाताख्यगोपालबागस्थयतीन्द्रमोहनठाकुरः।

प्रा० वाक्यं। एकदा गोकुले रम्ये नानाद्वारमन्दिरे।
नानामणीन्द्रनिर्माणे श्वेतचामरशोभिते॥
गोपबालकोटिभिः सार्द्धं गोपिकानां तथैव च।
पार्षदैर्विष्णुरूपैश्च ब्रह्मविष्णुशिवादिभिः॥

समाप्तिवा०। खण्डितत्वात् शेषवाक्यं नास्ति।

विषयः। १ पटले नारायणं प्रति राधिकाया गोपकुलवासादिविषयकविविधप्रश्नोत्तरे। २, ब्रह्मशिलादिब्रह्मलिङ्गादीनां लक्षणं। ३, सिद्धस्थानादिविनिर्णयः।

४, पवकृत्यामितस्नानादिकथनं । ५—६, कम्बुमेकरमहादेवावस्थित्यादिकथनं ।
७, कम्बकारकादिवर्णनं । ८, कम्बोलोपैकाहत्यादिपाठमाहात्म्यकथनं ।
एवमष्टौ पटलाः सन्ति ।

No. CCLXXXVIII.

Liṅgárchana Tantra. The rules and advantages of worshiping the Liṅgam.

२८८ । लिङ्गार्चनतन्त्रम् ।

ग्रन्थकारः——?

विवरणं । प्राचीनं परिशुद्धप्रायञ्च । प० ६९ । पङ्क्ति० ५—६ । स्लो० १००० । अ० बङ्गीयं ।
आ० कागजः । का०—? । स्था० कलिकातास्थश्रीयुतबाबुयतीन्द्रमोहनठाकुरः ।

प्रा० वाक्यं । श्रीदेव्युवाच । कामरूपसमासीनं शङ्करं विश्वेश्वरं ।
पप्रच्छ सादरं देवी योगमाया जगन्मयी ॥
तपोधन महादेव सर्व्वेषामीश्वर प्रभो ।
पुरा यत् कथितं देव शिवलिङ्गार्चनं प्रभो ॥
हृदये विद्यते देव मम सन्देहकं सदा ।
इदानीं परमेशान कृपया भक्तवत्सल ॥
शिवलिङ्गार्चनं तत्त्वं विचार्य्य कथय प्रभो ।

समाप्तिवा०। स एव शम्भो देवेशि स एव श्रीसदाशिवः ।
कैलासशतसाकारं पश्यामि तस्य मन्दिरं ॥
इति लिङ्गार्चनतन्त्रे देवीश्वरसंवादे ज्ञानप्रकाशेऽष्टादशपटलः समाप्तः ॥

विषयः । १ पटले सर्व्वपूजानामादौ लिङ्गपूजावश्यकत्वकथनं । २, शिवलिङ्गपूजनादिविधानं । ३, मन्त्रादिधारणविधानं । ४, पूजाङ्गध्यानादिविधानं । ५, पूजाधिष्ठानमण्डलयन्त्रादिकथनं । ६, पञ्चकोपाख्यानकथनं । ७, पारदपूर्ण्यादिपूजाविधानं । ८, श्मशानस्था मायायन्त्रादिकथनं । ९, षोडशोपचारादिकथनं, प्रलयादिकाले पूजावश्यकत्वविधानञ्च । १०, निजपापनादिना लिङ्गपूजाविधानं । ११, देवीं प्रति महादेवस्य नानाज्ञानाद्युपदेशः । १२, शिवलिङ्गरहस्यकथनं । १३, शिवनिर्म्माल्यकूपलक्षणकथनं । १४, ज्ञानोपदेशः । १५, तत्त्वज्ञानकथनं । १६, श्रीफलपत्रकथनं । १७, योगकथनं १८, शिवलिङ्गार्चनफलकथनं ॥

No. CCLXXXIX.

Mahánirvána Tantra. One of the original and most revered of Tantras, attributed to Mahádeva. The MS. includes only the first half in 14 chapters. Contents: 1, enquiry into salvation; 2-3, adoration of Para Brahma; 4, ditto of Prakṛiti or the female energy; 5, the decasyllabic mantra of the Deví, and adoration therewith; 6, homa, magic circles, &c.; 7, the cult of the Kaulas; 8, duties of the several castes and orders of men; 9, the ten sacraments; 10, S'ráddhas and other ceremonies; 11, expiations: 12, rules regarding conduct; 13, consecration of houses, tanks, temples, alms, images of gods, &c.; 14, consecration of Liñgams; fourteen orders of Avadhúta ascetics, &c.

२८९। महानिर्वाणतन्त्रं।

ग्रन्थकारः —— ?

विवरणं। नवीनं परिशुद्धप्रायञ्च। प० १२५। पङ्क्ति० ९। श्लो० २६००। अ० बङ्गीयं।
आ० कागजः। का० —? स्था० कलिकाताश्रीयुतबाबुयतीन्द्रमोहनठाकुरः।

प्रा० वाक्यं। गिरीन्द्रशिखरे रम्ये नानारत्नोपशोभिते। नानावृक्षलताकीर्णे नानापक्षिरवैर्युते॥

समाप्तिवा०। महानिर्वाणतन्त्रस्य माहात्म्यं किं ब्रवीमि ते।
विदित्वैनं महातन्त्रं ब्रह्मनिर्वाणमाप्नुयात्॥
इति श्रीमहानिर्वाणतन्त्रे सर्वतन्त्रोत्तमोत्तमे सर्वधर्मनिर्णयसारे श्रीमदाद्यासदाशिवसंवादे पूर्वकाण्डे शिवलिङ्गस्थापनचतुर्विधावधूतविवरणकथनं नाम चतुर्दशोल्लासः। समाप्तोऽयं पूर्वकाण्डः॥

विषयः। इदं खण्डद्वयविभक्तं। अत्र पूर्वार्द्धमात्रं वर्त्तते। अत्र चतुर्दशोल्लासाः सन्ति। तत्र १ प्रथमे, जीवनिस्तारोपायविषयकप्रश्नो भगवत्या महादेवं प्रति। २, परब्रह्मोपासनक्रमविषयकमहादेवोत्तरं। ३, परब्रह्मोपासनकथनं। ४, प्रकृतिसाधनोपक्रमः। ५, देव्या दशाक्षरादिमन्त्रोद्धारकलशस्थापनतत्त्वसंस्काराः। ६, श्रीपात्रस्थापनहोमचक्रानुष्ठानकथनं। ७, कुलतत्त्वकथनं। ८, वर्णाश्रमाचारकथनं। ९, कुशण्डिकादशविधसंस्कारविधिकथनं। १०, वृद्धिश्राद्धादिमृतक्रियापूर्णाभिषेककथनं। ११, अपराधिदण्डनपापप्रायश्चित्तकथनं। १२, सनातनव्यवहारकथनं। १३, वास्तुपुष्करिण्याश्रयादिदेवमूर्त्तिदानादि-सर्वदेवप्रतिष्ठाकथनं। १४, शिवलिङ्गस्थापनचतुर्विधावधूतविवरणकथनं।
ग्रन्थोऽयं सर्वोत्तम इत्यवधार्यते॥

No. CCXC.

Kulárṇava Tantra. An original and standard Tantra—the text book of the Kaulas. Contents: 1, existence of created beings; 2, praise of the Kaula tenet; 3, praise of Urdhámnáya, &c.; 4, derivation of mantras, and rules regarding the regulation of the breath; 5-6, consecration of articles necessary for the Kaula form of worship; 7, adoration of the Vaṭuka attendants of S'iva and his consort; 8, rules regarding drinking during worship; 9, Yoga; 10, particular forms of worship; 11, rules of conduct for Kaulas; 12, respect for the shoes of S'rí; 13-14, teacher and the taught, their characteristics and trials; 15, mode of attaining perfection in mantras; 16, rites for the attainment of desirable objects; 17, miscellaneous rules regarding Kaula teachers.

२६० । कुलार्णवतन्त्रं ।

ग्रन्थकारः——?

विवरणं। नवीनं परिशुद्धप्रायञ्च । प० ६६ । पङ्क्ति० ९ । श्लो० २००० । अ० वङ्गीयं। आ० कागजः । का०—? । स्था० कलिकातास्थश्रीयुतबाबुयतीन्द्रमोहनठाकुरः ।

प्रा० वाक्यं। कैलासशिखरासीनं देवदेवं जगद्गुरुं ।
पप्रच्छेशं परानन्दं पार्व्वती परमेश्वरं ॥
श्रीदेव्युवाच । भगवन् देवदेवेश पञ्चकृतुविधायक ।
सर्व्वज्ञ भक्तिसुलभ शरणागतवत्सल ॥

समाप्तिवा०। ऊर्द्धाम्नायः समाख्यातः समासेन च विस्तरात् ।
कुलार्णवमिदं शास्त्रं भुक्तिदमुपवर्णितं ॥
इति श्रीकुलार्णवमहारहस्ये सर्व्वागमोत्तमोत्तमे सपादलक्षग्रन्थे पञ्चमखण्डे गुरुनामवासनादिकथनं नाम सप्तदशोल्लासः ॥

विषयः। १, जीवस्थितिकथनं । २, कुलमाहात्म्यकथनं । ३, ऊर्द्धाम्नायादिमाहात्म्यकथनं । ४. मन्त्रोद्धारप्राणायामकथनं । ५. कुलद्रव्यादिसंस्कारकथनं । ६, द्रव्यसंस्कारादिकथनं । ७, वटुकादिपूजाविधानं । ८, तत्त्वत्रयोल्लासपानभेदकथनं । ९, योगादिकथनं । १०, विशेषपूजाकथनं । ११, कुलाचारविधिकथनं । १२, श्रीपादुकाभक्तिलक्षणकथनं । १३. गुरुशिष्यलक्षणकथनं । १४, गुरुशिष्यादिपरीक्षाकथनं । १५. पुरश्चरणविधिकथनं । १६. काम्यकर्म्मविधानं । १७, गुरुनामवासनादिकथनं ।

No. CCXCI.

Dakshiná-Kalpa. Manual of S'ákta worship. By Haragovinda Tattvavágis'a.

२९१ । दक्षिणाकल्पः ।

ग्रन्थकारः हरगोविन्दतत्त्ववागीशः ।

विवरणं । नवीनं परिशुद्धप्रायञ्च । प० ५६ । पङ्क्ति० ८ । श्लो० १००० । अ० वङ्गीयं । आ० कागजः । का०—? । स्था० कलिकातास्थश्रीयुतबाबुयतीन्द्रमोहनठाकुरः ।

प्रा० वाक्यं । प्रणम्य शिरसा देवं गुरुञ्च ज्ञानदायकं ।
हरगोविन्दतत्त्वादिवागीशेन मयाधुना ॥
नानातन्त्रात् समाहृत्य सारमादाय यत्नतः ।
कथ्यते दक्षिणाकल्पः प्रयोगविधिवत्तमः ॥

समाप्तिवा० । शेषं खण्डितं ।

विषयः । अत्र किञ्चिदधिकचयोदशपरिच्छेदा लभ्यन्ते । पुरश्चरणकृत्यभेदशाक्तप्रशंसा । दक्षिणकालिकामन्त्रोद्धारप्रातःकृत्यस्नानतिलकविधिः । सन्ध्यादिविधिः । पूजास्थाननिर्णयः । दिङ्नियमशिवपूजादिविधानगुरुपूजास्तोत्रादिदक्षिणकालिकापूजामन्त्रादिप्रतिपादनं ।

No. CCXCII.

Rudrayámala Tantra. An elaborate and original Tantra, including the whole range of S'ákta knowledge about religion, social orders, castes, sacred places, modes of adoration, forms of ceremonies, &c., &c. The MS. is imperfect, and contains nine thousand verses divided into 67 sections.

२९२ । रुद्रयामलं ।

ग्रन्थकारः—?

विवरणं । नवीनं परिशुद्धप्रायञ्च । प० २५८ । पङ्क्ति० ७ । श्लो० ९००० । अ० वङ्गीयं । आ० कागजः । का०—? । स्था० कलिकातास्थश्रीयुतबाबुयतीन्द्रमोहनठाकुरः ।

प्रा० वाक्यं । भैरव उवाच । पुरा श्रीपरमेशानीवदनाम्भोजनिःसृतं ।
श्रीयामलं महातन्त्रं स्वतन्त्रं विष्णुयामलं ॥
शक्तियामलमाख्यातं ब्रह्मयामलहेतुना ।

ब्रह्मयामलभेदांश्च सर्व्वेच कथितं प्रिये ॥

रुद्रानीमपराकाण्डं वद श्रीरुद्रयामलं।

समाप्तिवा० । शेषं खण्डितं ।

विषयः । अत्र प्रथषष्टिसङ्ख्यकाः पटलाः सन्ति । १, सिद्धमन्त्रप्रकरणं । २, सर्व्वचक्रानुष्ठानसङ्गाङ्गप्रकरणं । ३, सर्व्वचक्रानुष्ठाने सिद्धमन्त्रप्रकरणे भावनिर्णयः । ४—५, चक्रानुष्ठानप्रकरणं । ६—७, कुमार्य्युपचर्य्याविन्यासप्रकरणं । ८, कुमारीपूजादिविवरणं । ९, कुमारीकवचोल्लासः । १०, कुमार्य्याः अष्टोत्तरसहस्रनाम । ११, पशुभावविचारः । १२, आज्ञाचक्रसङ्केतसिद्धमन्त्रप्रकरणं । १३, आज्ञाचक्रसारसङ्केतकथनं । १४, भरण्यादिसप्तविंशतिनक्षत्रफलाफलकथनं । १५, वेदप्रकरणं । १६, वेदभाषापरिच्छेदः । १७, अथर्व्ववेदप्रकरणं । १८, चतुर्वेदोल्लासः । १९, प्रश्नचक्रसारसङ्केते चतुर्वेदोल्लासः । २०, फलचक्रसारसङ्केते चतुर्वेदोल्लासः । २१, भूमिचक्रस्वर्गचक्रतुलाचक्रवारिचक्रसारसङ्केते मूलपद्मोल्लासः । २२, षट्चक्रसारसङ्केते योगशिक्षाविधिः । २३, आसनकथनं । २४, योगशास्त्रतात्पर्य्यार्थकथनं । २५, ब्रह्मतत्त्वप्रकरणं । २६, प्राणायामनिरूपणं । २७, शक्तितत्त्वकथनं । २८, मन्त्रसिद्धिलक्षणकथनं । २९, षट्चक्रप्रकाशे महाप्रलयनिर्णयः । ३०, षट्चक्रसिद्धिसाधने डाकिनीप्रमुखस्तोत्रं । ३१, भैरव्यादिस्तोत्रं । ३२, स्कन्दवासिनीस्तोत्रं । ३३, स्कन्दवासिनीकवचं । ३४—३५, पञ्चामरायोगसाधनं । ३६, महाकुण्डलिन्यष्टोत्तरसहस्रनामस्तवः । ३७, स्वाधिष्ठानश्रीकृष्णराकिणीसाधनं । ३८, श्रीकृष्णस्वाधिष्ठानप्रवेशः । ३९, श्रीकृष्णस्यकवचं । ४०, षड्दलवर्णप्रकाशः । ४१, राकिणीस्तोत्रं । ४२, राकिण्या अष्टोत्तरसहस्रनामस्तोत्रं । ४३, षट्चक्रभेदादिकथनं । ४४, मणिपूरचक्रभेदप्रकारः । ४५, वितत्त्वलाकिनीशक्तिस्तवः । ४६, वर्णध्यानकथनं । ४७, रुद्रशक्तिलाकिनीस्तोत्रं । ४८, रुद्रमन्त्रप्रकाशः । ४९, रुद्रमृत्युञ्जयस्तवः । ५०, लाकिनीशक्तिस्तवः । ५१, मणिपूरभेदप्रकाशः । ५२, महारुद्रमृत्युञ्जयलाकिनीसाष्टोत्तरशतसहस्रनाम । ५३, मन्त्रार्थचैतन्यविन्यासः । ५४, मणिपूरभेदः । ५५, अमरचामरादिपञ्चद्रव्यसाधनं । ५६, हठयोगकथनं ५७, अनाहतपद्मविन्यासः । ५८—५९, काकिनीश्वरवर्णपार्श्वचरयजनादिकथनं । ६०, काकिनीसिद्धिसाधनं । ६१, काकिनीस्तोत्रविन्यासः । ६२, काकिन्यष्टोत्तरशत सहस्रनामस्तोत्रं । ६३, ईश्वरस्तोत्रविन्यासः । ६४—६५, अनाहतेश्वरसम्मोहनाख्यकवचं । ६६, शाकिनीशिवार्च्चनं । ६७, शाकिनीस्तोत्रविन्यासः ॥

No. CCXCIII.

Nigama Kalpadruma. A Tantra compilation, on secret or licentious worship. Contents : 1, praise of wine, flesh, fish, gesticulation and female society ; 2, the reason why they should be purified ; 3, the noblest form of worship ; 4, praise of women as an instrument of worship ; 5, particulars thereof ; 6, worship thereof ; 7, especial worship ; 8, ditto with *svayambhu-kusuma*, a kind of filthy rag ; 9, purification of the five essentials of worship noticed in the 1st chapter ; 10, particular kinds of flesh, and their purification.

२९३ । निगमकल्पद्रुमः ।

ग्रन्थकारः—?

विवरणं । प्राचीनं परिशुद्धप्रायञ्च । प० २६ । पङ्क्ति० ४ । श्लो० ६०० । स्व० वङ्गीयं । आ० कागजः । का०—? । स्था० कलिकातास्थश्रीयुतबाबुयतीन्द्रमोहनठाकुरः ।

प्रा० वाक्यं । कैलासशिखरे रम्ये क्रोडस्थां नगनन्दिनीं ।
एतैः प्राथम्यसमये भगवान् शङ्करोऽब्रवीत् ॥

समाप्तिवा० । शक्तिसन्तोषमात्रेण पूर्णा यान्ति कुलक्रिया ।
येन तेन प्रकारेण शक्तिसन्तोषणं चरेत् ॥
इति निगमकल्पद्रुमे श्रीशिवपार्वतीसंवादे दशमः पटलः ॥

विषयः । १ पटले पञ्चमकारप्रशंसा । २, पञ्चमकारशुद्धिकारणकथनं । ३, परमसाधनकथनं। ४, स्त्रिया माहात्म्यं । ५, तदङ्गविशेषप्रभेदादिकथनं । ६, तदीयपूजनादिकथनं । ७, तदीयसाधनविशेषकथनं । ८, स्वयम्भुकुसुमाभिधानं । ९, पञ्चतत्त्वादिशोधनं १०, मांसविशेषादिकथनं तदीयशोधनप्रकारश्च ।

No. CCXCIV.

Brahmáṇḍa Tantra. A Tantra in which Náráyaṇa, in reply to a question from Nárada, expounds the truth about Brahma, Prakṛiti or female energy, and *Pralaya* or periodical destruction of the universe. Contents : 1, Unity of Prakṛiti and Purusha ; 2, praise of S'akti ; 3, description of Goloka, the region of Vishṇu ; 4, incarnation of Prakṛiti ; 5-6-7, various names of Prakṛiti ; 8, worship of Táriní ; 9, true knowledge explained ; 10, hymn to Prakṛiti ; 11, distinction between Prakṛiti and Purusha.

२९४ । ब्रह्माण्डतन्त्रं ।

ग्रन्थकारः नारायणः ।

विवरणं । प्राचीनं परिशुद्धप्रायच । प० १७ । पङ्क्ति० ७ । श्लो० २०० । अ० बङ्गीयं । आ० कागजः । का०—? । स्था० कलिकाताख्यश्रीयुतबाबुयतीन्द्रमोहनठाकुरः ।

प्रा० वाक्यं । नारायणं नमस्कृत्य नारदो मुनिपुङ्गवः । पप्रच्छ वेदसारञ्च सारभूतं सुमङ्गलं ॥
नारद उवाच । ब्रह्म किं वद साकारं किं निराकारमीश्वरं ।
प्रलयं कीदृशं नाम का वा प्रकृतिरीश्वरी ॥

समाप्तिवा० । किम्भेदो लक्ष्यते तत्र यज्जले प्रैत्यमेव तत् ।
अत एव हि योगीन्द्रैः स्त्रीपुम्भेदो न लक्ष्यते ॥
इति ब्रह्माण्डतन्त्रे एकादशः पटलः ॥

विषयः । १ पटले । प्रकृतिपुरुषयोरभेदकथनं । २, शक्तिमाहात्म्यं । ३, गोलोकधामरूपाम्बकथनं । ४, प्रकृतीनामाविर्भावादिकथनं । ५, प्रकृतिनामानि । ६—७, प्रकृतिनामानि । ८, तारिणीपूजाकथनं । ९, तत्त्वज्ञानकथनं । १०, प्रकृतिस्तवः । ११, प्रकृतिपुरुषविवेचन ।

No. CCXCV.

Pichchhilá Tantra. An original Tantra in two parts: the MS. includes the first. Contents: 1, characteristics of the spiritual guide; 2-3, praise of Káliká; 4, mantra of Krishṇa; 5, initiation; 6, rules for bringing people under control by charms; 7, mantras for seizing thieves, &c.; 8, ditto for overcoming snake poison; 9, the mystic diagram called *sarvatobhadra;* 10, individual peculiarities; 11, mantras of Káliká; 12, daily worship; 13, pacification of demons; 14, mantras of Durgá; 15, worship of virgins; 16, six mystic circles; 17, praise of the mantra of Káliká; 18, charm bearing the name of Bhuvanes'vari; 19, mantra of Mahá Kálí; 20, origin of Vidyá; 21, monosyllabic mantra of Káliká.

२९५ । पिच्छिलातन्त्रं पूर्वार्द्धं ।

ग्रन्थकारः———?

विवरणं । नवीनमपरिशुद्धञ्च । प० १९ । पङ्क्ति० ७ । श्लो० २५० । अ० बङ्गीयं । आ० कागजः । का०—? । स्था० कलिकाताख्यश्रीयुतबाबुयतीन्द्रमोहनठाकुरः ।

प्रा॰ वाक्यं। कैलासशिखरासीनं देवदेवं हरध्वजं। भवानी रहसि प्रीत्या जगाद मधुरं वचः॥
श्रीदेव्युवाच। भगवन् देवदेवेश लोकानुग्रहकारक।
सूचितं यत् पुरा देव कालिकासाधनक्रमं॥

समाप्तिवा॰। कथितं।

विषयः। १, गुरुलक्षणं। २—३. कालिकायाः प्रशंसा। ४, लक्ष्मीमन्त्रकथनं। ५. होमप्रयोगविधानं। ६, वशीकरणकथनं। ७, चौरधारणार्थकप्राकृतभाषीयमन्त्रादिकथनं। ८, सर्पविषनाशकमन्त्रादिकथनं। ९, सर्व्वतोभद्रमण्डलकथनं। १०, भावप्रभेदकथनं। ११, कालीमन्त्रकथनं। १२. नित्यपूजाविधिकथनं। १३. भूतशुद्धिविधानं। १४, दुर्गामन्त्रकथनं। १५, कुमारीपूजनक्रमः। १६, षट्चक्रक्रमनिरूपणं। १७, कालीमन्त्रप्रशंसा। १८, भुवनेश्वरीकवचं। १९. महाकालीमन्त्रकथनं। २०, विद्योत्पत्तिप्रकारकथनं। २१, कालिकाया एकाक्षरमन्त्रनिरूपणं।

No. CCXCVI.

Vákyatattva. A Smárta treatise by Siddhánta Panchánana, on time meet for religious ceremonies.

२९६। वाक्यतत्त्वं।

ग्रन्थकारः सिद्धान्तपञ्चाननः।

विवरणं। परिमाणं प्राचीनञ्च। प॰ १२। पङ्क्ति॰ ५—६। श्लो॰ २१०। अ॰ वङ्गीयं। आ॰ तुलटकागजः। का॰—?। स्था॰ ढाकानिकटस्थपुराणगतमहाराजनगरस्थ-श्रीयुतकालीकृष्णतर्कापाध्यायः।

प्रा॰ वाक्यं। वाक्यतत्त्वं निरूप्यते। तत्र वाक्यं मासपक्षतिथिघटितं।
मासपक्षतिथीनाञ्च निमित्तानाञ्च सर्व्वशः।
उल्लेखनमकुर्व्वाणो न तस्य फलभाग् भवेत्॥

समाप्तिवा॰। पूर्व्ववद्देवान्यत्र सुगममित्याह। इति सिद्धान्तपञ्चाननकृतं वाक्यतत्त्वं समाप्तम्॥

विषयः। मासपक्षादिघटितवाक्यस्य तात्पर्य्यनिर्णयः।

No. CCXCVII.

Kávyádars'a-vyákhyá. A commentary on the Kávyádars'a, a treatise on rhetoric, by Dandí.

२९७ । काव्यादर्शव्याख्या ।

ग्रन्थकारः——? ।

विवरणं । अपरिशुद्धं प्राचीनं । प० ९ । पङ्क्ति० ८—९ । श्लो० १०० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० ढाकाविक्रमपुरान्तर्गतमहाराजनगरस्थश्रीयुत-कालीकृष्णगङ्गोपाध्यायः ।

प्रा० वाक्यं । काव्यलक्षणमारभमाणः काव्यस्य वाङ्मयत्वात् तदधिष्ठात्रीं सरस्वतीं कीर्त्तयन्नाह चतुर्मुखेत्यादि । भगवता मुखानां बहुत्वात् अम्भोजवनत्वेन निरूपणं ॥

समाप्तिवा० । अतस्तन्नैर्भिङ्गतास्तस्यैः ईश्वते मसर्था भवन्ति ।

इति काव्यादर्शटीकायां प्रथमपरिच्छेदस्य व्याख्या समाप्ता ॥

विषयः । दण्ड्याचार्य्यकृतकाव्यादर्शनामालङ्कारग्रन्थस्य व्याख्या ।

No. CCXCVIII.

Saṅkalpachandriká. A Smriti treatise on resolution to commence a religious ceremony. By Raghunandana Bhaṭṭácharya, the author of the 28 Tattvas.

२९८ । सङ्कल्पचन्द्रिका ।

ग्रन्थकारः रघुनन्दनः ।

विवरणं । परिशुद्धं प्राचीनञ्च । प० ४ । पङ्क्ति० ४—७ । श्लो० १०० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० ढाकाविक्रमपुरान्तर्गतमहाराजनगरस्थश्रीयुत-कालीकृष्णगङ्गोपाध्यायः ।

प्रा० वाक्यं । श्रीगुरोश्चरणद्वन्द्वं नत्वा सङ्कल्पचन्द्रिकां । गङ्गातीरसमुद्भूतः करोति रघुनन्दनः ॥ अथ कस्तावत् सङ्कल्प इति चेत् अत्र हारीतः । मनसा सङ्कल्पयति वाचाभि-लपति कर्म्मणा चोपपादयति । तथा तत्त्वपुराणेऽपि । आसाद्य च शुभं कार्य्य-मुद्दिश्य च मनोगतं ।

समाप्तिवा० । अतः पदस्याहोरात्रार्थकतयाऽत्र चावगतत्वात् ।

इति रघुनन्दनभट्टाचार्य्यकृता सङ्कल्पचन्द्रिका समाप्ता ॥

विषयः । सङ्कल्पपदार्थादिनिरूपणं ।

No. CCXCIX.

Mímáñsá-nyáya-prakás'a. A treatise on the elements of the Mímáñsá philosophy, by Ápadeva son of Anantadeva. Dr. Hall describes this work as "of first-rate repute and great comparative currency." *Contributions* &c., p. 185.

२९९ । मीमांसान्यायप्रकाशः ।

ग्रन्थकारः आपदेवः ।

विवरणं । प्राचीनमपरिशोधितञ्च । प० ५२ । पङ्क्ति० १०—१२ । श्लो० २५०० । आ० वर्त्तुलं । अ० तुलटकागजः । का०—? । स्था० कमलोप्रदेशान्तर्गतवंशवाटग्रामस्थः श्रीवर्द्धमानाधिपतेः सभापण्डितः श्रीयुततारकनाथतत्त्वरत्नः ।

प्रा० वाक्यं । यत्कृपालेशमात्रेण पुरुषार्थचतुष्टयं । प्राप्यते सततं वन्दे गोविन्दं भक्तवत्सलं ॥
अनन्तगुणसम्पन्नमनन्तभजनप्रियं । अनन्तरूपिणं वन्दे गुरुमानन्दरूपिणं ॥
इह खलु परमकारुणिकेन भगवता जैमिन्यृषिणा अथातो धर्म्मजिज्ञासा इत्यादिना द्वादशसु अध्यायेषु धर्म्मो विचारितः । तत्र वेदेन प्रयोजनमुद्दिश्य विधीयमानो धर्म्मः । यथा यागादिः ।

समाप्तिवा० । ग्रन्थरूपो मदीयोऽयं वाग्व्यापारः सुशोभनः ।
अनेन प्रीयतां देवो गोविन्दो भक्तवत्सलः ॥
इति श्रीमदनन्तदेवसूनुना आपदेवेन कृतं मीमांसान्यायप्रकाशभधुरं मीमांसाप्रकरणं समाप्तं ॥

विषयः । मीमांसादर्शनप्रतिपादितधर्म्मप्रमाणादिपदार्थनिरूपणं ।

No. CCC.

Muktitattva. Nine dissertations on the means of salvation as described by the Vedántic philosophers. By Rámánanda S'vámí.

३०० । मुक्तितत्त्वं ।

ग्रन्थकारः रामानन्दस्वामी ।

विवरणं । परिशुद्धं नवीनं । प० २४ । पङ्क्ति० ९—९ । श्लो० ७२० । आ० वर्त्तुलं । अ० तुलटकागजः । का०—? । स्था० कमलोप्रदेशान्तर्गतवंशवाटग्रामस्थः श्रीवर्द्धमानाधिपतेः सभापण्डितः श्रीयुततारकनाथतत्त्वरत्नः ।

प्रा० वाक्यं । ननु नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि ।

अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम् ॥

इति कथं सङ्गच्छते कल्पान्तकाले कर्माभावात् । अत्र केनचिदुक्तं । कल्पेनाशो नास्ति नित्यत्वात् । तथाच प्रमाणं । नासदुत्पद्यते न च सद् विनश्यति इति । न च कदाचिदनीदृशं जगदिति च ॥

समाप्तिवा० । एवमेवात्मबुद्ध्या तु मायात्मानं विचिन्तय ।

तेनैव सद्भिन्नो हि भविष्यसि सुनिश्चितं ॥

इति श्रीमन्मुक्तितत्त्वे परमरहस्योपदेशे नवमः परिच्छेदः ॥

समाप्तोऽयं ग्रन्थः ॥

विषयः । १, परिच्छेदे ब्रह्मनिरूपणं । २, संसारवैचित्र्यकथनं । ३, जीवस्य बन्धननिवृत्तिहेतुकथनं । ४, षडङ्गयोगकथनं । ५, भक्तिसूत्रकथनं । ६, साधनोपदेशे शाण्डिल्यविद्याकथनं । ७, ब्रह्मचार्य्युदासीनवानप्रस्थसन्न्यासिनां सर्वेषामेव यथाक्रमं मुक्तेर्विधानकथनं । ८, मरणविशेषेण तीर्थादौ मुक्तिकथनं । ९, निर्व्वाणमुक्तेर्मुख्यत्वकथनं तदुपायनिरूपणञ्च ॥

No. CCCI.

Bálabodhiní.—A commentary on the Gíta-Govinda of Jayadeva. By Chaitanya Dása.

३०१ । बालबोधिनी ।

ग्रन्थकारः चैतन्यदासः ।

विवरणं । प्राचीनं प्रायशः शुद्धञ्च । प० ४१ । पङ्क्ति० ९ । श्लो० ८०० । अ० वङ्गीयं । धा० तुलटकागजः । का०—? । स्था० जमलीपरदेशान्तर्गतमवाड्ग्रामस्थ श्रीयुक्ततारकनाथतर्करत्नः श्रीयुक्तवर्द्धमानाधिपतेः सभापण्डितः ।

प्रा० वाक्यं । श्रीचैतन्यपादपद्ममधुव्रतेन केनचित् । टीका सङ्गृह्यते गीतगोविन्दस्य समासतः ॥

सयत्नोऽकुमभिप्रायं जयदेवमहात्मनः । क्रमेणोपक्रमाद्येषा प्रथ्यते बालबोधिनी ॥

अत्र व्याकरणादीनां ग्रन्थबाहुल्यभीतितः ।

विवृतिर्न कृता सा स्याद् ज्ञेया ग्रन्थान्तराद् बुधैः ॥

यत्नतो बालबोधिन्यां शब्दार्थः शब्दवेदिभिः ।

भावार्थदीपिकायाञ्च भावो भावार्थकोबुधैः ॥

समाप्तिवा० । श्रीगोविन्दपादसेवाप्रभावादुदिता स्वयं ।
येनन्यद्वाशतो बालबोधिनी स्यात् सतां मुदे ॥
श्रीमद्रूपसनातन् वन्दे दण्डवत् भुवि सम्पतन् ।
समर्थात्कर्षपीयूषं साध्यते यैरचर्निशम् ॥ समाप्ता चेयं बालबोधिनी ॥

विषयः । जयदेवगोस्वामिप्रणीतगीतगोविन्दकाव्यस्य तात्पर्य्यार्थविवरणं ।

CCCII.

Rámalílodaya.—An epic poem, in twenty cantos, on the life of Ráma from his birth to his coronation. By Rámakánta.

३०२ । रामलीलोदयं ।

ग्रन्थकारः रामकान्तः ।

विवरणं । नवीनं परिशुद्धञ्च । प० ९१ । पङ्क्ति० ११ । श्लो० ४५०० । आ० वर्त्तुलं ।
आ० कागजः । शकाब्दाः १७८० । स्था० हुगलीप्रदेशान्तर्गतवंशवाट्याख्यग्रामस्थः
श्रीयुक्तवर्द्धमानाधिपतेः सभापण्डितः श्रीयुततारकनाथतर्करत्नः ।

आ० वाक्यं । नवीननवनीरदप्रभमतीवमुग्धज्वल-
मणिव्रजमुदञ्चति प्रबलवीचिमातन्वति ।
हतात्मिमुरसा ·ह्रया चरणजानुमूर्द्धा द्दुदा
भुजेन वचसा भृशं मधुरमूर्त्तिरामं भजे ॥ १ ॥
को जानाति महेन्द्रवज्रवपुषो वातात्मजस्याभवं
विक्रान्तं जननीप्रसूतिसमयेऽधावत् प्रचण्डद्युतिं ।
यो गम्भीरपयोधिपारमगमत् लीलारसव्यञ्जनात्
दग्ध्वा काञ्चनपत्तनञ्च त्वमहत्रामगात् पुनः ॥ २ ॥
यस्यानुग्रहभावतो जडजनैः पाण्डित्यमातन्यते
येन श्रीरघुनाथपादकमले भृङ्गीकृतं मानसं ।
येनानीय महौषधालयगिरिं श्रीलक्ष्मणो रक्षितः
तं वन्दे सुरमनुदर्पदलनं वीरं समीरात्मजं ॥ ३ ॥

समाप्तिवा० । वीरश्रीयुतरामकान्तकृतिना सर्गापवर्गार्थिना
पाठार्थायविचारसञ्जनमनोमोदं समाकाङ्क्षिणा ।
श्रीवाणेश्वरसूनुना विरचिते श्रीरामलीलोदये
काव्ये विंशतिरीरितोऽतिरुचिरो रामाभिषेकाभिधः ॥ २० ॥

विषयः । १ सर्गे, श्रीरामजन्म । २, जानकीपरिणयः । ३, रामवनवासः । ४, दशाननाभि-गमनं । ५, भरतागमः । ६—७, जानकीहरणं । ८, जटायुदाहः । ९, हनुमत्-प्रत्यागतिः । १०, सीतासन्देशः । ११, विभीषणाश्वासः । १२, लङ्कागमनं । १३, लक्ष्मणशक्तिभेदः । १४, अतिकायनिकुम्भवधः । १५, इन्द्रजिद्युद्धं । १६, मयशक्तिमोचनं । १७, रामचन्द्रकर्त्तृकब्रह्मास्त्रपरित्यागः । १८, युद्धसंवादकथनं । १९, भरतदर्शनं । २०, श्रीरामाभिषेकः ।

CCCIII.

Siddhánta Gítá.—A treatise on salvation. It says that the first three Vedas are the great causes of bondage, and the last the means of freedom from transmigration and of eternal beatitude. It is said to be a part of a work named *Atharva-rahasya,* and is divided into eight chapters.

३०३ । सिद्धान्तगीता ।

ग्रन्थकारः——? ।

विवरणं । देशीयकागजम् । प० ९ । पङ्क्ति० ७—११ । श्लो० २०० । अ० नवीनं । ला० इंरेजीयकागजः । शकाब्दाः १७८७ । स्था० कमलोरदेशान्तर्गतवर्द्धमानाद्याम-पामस्थः श्रीयुततारकनाथतर्करत्नः श्रीयुक्तवर्द्धमानाधिपतेः सभापण्डितः ।

आ० वाक्यं । श्रीअर्जुन उवाच । देवादिदेव देवेश कथयस्व महामते ।
केन ज्ञानप्रभावेन मुच्यते भवबन्धनात् ॥ १ ॥
श्रीभगवानुवाच । वेदत्रयं महाप्राज्ञ भवबन्धनकारणं ।
चतुर्थेन परिज्ञातं मुच्यते भवसागरात् ॥ २ ॥
ऋग्यजुःसामभेदोऽयं परित्याज्यो महामते ।
वेदे चाथर्वणे सारं पाठयित्वा प्रयत्नतः ॥ ३ ॥
तथापि प्रणवो मूलं विचार्य्यैव पुनः पुनः ।
वेदत्रयविनिर्मुक्तो मायामयविवर्जितः ॥ ४ ॥

समाप्तिवा० । सकलभुवनहेतुः ज्ञानमार्गैकसेतुः कुवचनजनबोधः सर्व्वसंसाररोधः ।
समुपजनितकान्तिः प्राणिनां मोक्षदायिनी छिनत्तु छिनत्तु दुःखं सद्गुरुः पातपूर्णं ॥
इति श्रीमदथर्व्ववेदरहस्ये श्रीकृष्णार्जुनसंवादे सिद्धान्तगीतायामष्टमोऽध्यायः ॥

विषयः। १ अध्याये, मतनिदर्शनं। २, वर्णाक्षरयोः परिचयः। ३, केवलं ब्रह्मेति प्रतिपत्तिः। ४, नवप्रस्थानतत्त्वोत्तमार्थविनाशदृष्टयः। ५, देवनिर्णयः। ६, त्रिविधदेवसमुच्चयः। ७, निर्गुणमतनामवर्णनं। ८, महाकारणदेहादिकथनम्॥

CCCIV.

Sriharistotra.—A hymn in praise of Hari. By S'ankara A'chárya.

३०४। श्रीहरिस्तोत्रं।

ग्रन्थकारः शङ्कराचार्य्यः।

विवरणं। नवीनं परिग्रहस्य। प० ४। पङ्क्ति० १६। श्लो० ११०। व० नवीनं। स्था० ईश्वरीयकालेजः। का०—?। स्था० कलकीप्रदेशान्तर्गतवंशवाटीग्रामनिवासि-श्रीगुरुतारकनाथतर्कवाचस्पतेः श्रीगुरुदयालामाधिपतेः समापयितः।

प्रा० वाक्यं। स्तोष्ये भक्त्या विष्णुमनादिं जगदादिं यस्मिन्नेतत् संसृतिचक्रं भ्रमतीत्थं। यस्मिन् दृष्टे नश्यति तत् संसृतिचक्रं तं संसारध्वान्तविनाशं हरिमीडे॥ १॥

समाप्तिवा०। इत्थं स्तोत्रं भक्तजनेयं भवतीति ध्यानार्कारं भगवत्पादीयमिदं यः। विष्णोर्लोकं पठति शृणोति व्रजति ज्ञानं ज्ञेयं सीमनि प्राप्नोति मनुष्यः॥ इति श्रीमच्छङ्कराचार्य्यविरचितं श्रीहरिस्तोत्रं समाप्तं॥

विषयः। ४४ सङ्ख्यकश्लोकात्मकमिदं स्तोत्रं। तत्र भगवतो नारायणस्य माहात्म्यप्रतिपादनम्॥

CCCV.

A'nandataranğini. Itinerary from Chandananagara to Benares, and description of the latter city, its foundation and ancient legends. By Vechaváma Nyáyálankára.

३०५। आनन्दतरङ्गिणी।

ग्रन्थकारः वेचारामन्यायालङ्कारः।

विवरणं। नवीनं परिग्रहस्य। प० ६६। पङ्क्ति० ४—११। श्लो० १०००। व० नवीनं।

ला० तुलजकायस्थः । शकाब्दाः १७२१ । स्था० जमलीप्रदेशान्तर्गतवंशवाड़ाग्रा-
धामस्थः श्रीयुक्तवर्द्धमानाधिपतेः सभापण्डितः श्रीयुततारकनाथतर्करत्नः ।

आ० भागः । विघ्नेशमाधवचतुर्भुजरुद्रपाणिश्रीकालभैरवगुहामरनिम्नगाभिः ।
दुर्गादिभिश्च मणिकर्णिकया च युक्ता वाराणसी मम मनोरथसिद्धयेऽस्तु ॥ १ ॥
आनन्दं ब्रह्मरूपं श्रुतिषु इति यदेकमेवाद्वितीयं
शक्ते न स्वात्मनो दर्शयितुमिति न भिन्ना च शक्तिर्जगत्सु ।
यः सर्व्वाधारबोधः स्वयमपि भगवान् चार्द्धनारीश्वरोऽभूत्
तत्पादाम्भोजयुग्मो भवतु मम मनश्चञ्चरीकस्थिराय ॥ २ ॥
प्रणम्य सच्चिन्त्य सदाशिवासतिं महेश्वरं सोममुपास्य कोऽपि सन् ।
सुनिर्म्मितानन्दतरङ्गिणीकृतौ करोति सिद्धान्ततरिं सतां मुदे ॥
कोमलोऽपि सतां श्लोको विघूर्णयति मानसं ।
विनाऽपि धातुवैषम्यात् यथा मातुलपुष्पकः ॥

समाप्तिः० । सिद्धान्तोत्तरराजरामतनयो वन्द्यान्वयः श्रीयुतो
वेचारामसुधीर्महेशनगरीं दृष्ट्वा चिरात्तो मुदा ।
तेनानन्दतरङ्गिणी कविमनःसन्तोषदा निर्म्मिता
सा वेचारामसमंमूलघटिता सेव्येऽस्य सर्व्वभूतां ॥
ग्रन्थसमाप्त्यनन्तरं ग्रन्थकृता पञ्चभिः श्लोकैः स्वपरिचयः प्रदत्तः । तेषामन्त्यः श्लोको यथा ।
यद्वैतत्परतत्त्वमद्भुततमं सत्काव्यरत्नाकरं
वेदानां सुखदेन तेऽतिपङ्कलं भैषज्यरत्नाकरं ।
तस्मात् श्रीमणिकर्णिकां सुरचिरां नेपालभूपाज्ञया
श्रीसिद्धान्तमनोरमां समकरोत् टीकां तथा ज्योतिषि ॥
महामहोपाध्यायश्रीराजरामसिद्धान्तभट्टाचार्य्यात्मजश्रीवेचारामन्यायालङ्कारविरचिता श्रीसिद्धान्ततरिनाम्नी श्रीआनन्दतरङ्गिणी टीका सम्पूर्णा ॥

विषयः । १ प्रथमसर्गे, ग्रन्थकथनं । अर्थात् चन्द्रनगरात् काशीपर्य्यन्तभागीरथीतीरवर्त्तिग्रामादिवर्णनं । २, मधुमिवारवसुवर्णनं । ३, रत्नपुरीनिधानकथनं । ४, चित्रसेनराजचरितवर्णनं । ५, वासभुजावरोधकथनं । ६, वासविलापकथनं । ७, तीर्थकथनित्तिचित्रकथनं । ८, काशीपुरीवर्णनं ग्रन्थसमाप्तिश्च ।

No. CCCVI.

Siddhántamaṇi-manjarí. An astrological compendium, by Vechá-ráma Nyáyálankára, containing detailed accounts of the effects of particular conjunctions of the Planets.

३०६ । सिद्धान्तमणिमञ्जरी ।

ग्रन्थकारः वेचारामन्यायालङ्कारः ।

विवरणं । नवीनं परिष्कृतञ्च । प॰ २२ । पङ्क्ति॰ ९—९ । श्लो॰ ४०० । व॰ नवीनं । आ॰ तुलटकागजः । शकाब्दाः १७१० । स्था॰ कलकत्ताप्रदेशान्तर्गतवंशवाट्याख्यग्रामवास-निवासिश्रीवर्द्धमानाधिपतिसभापण्डितश्रीयुततारकनाथतर्करत्नः ।

आ॰ वाक्यं । वाणीपाणिप्रशस्याङ्कुलकमलविलसन्नलिकोत्था समन्तात्
प्रोद्यद्दासान्तरालेगगनमधुरिमसम्पूर्णमातङ्कमाली ।
मीमांसान्यायवैशेषिककविरसविचारप्रयाणातिमुग्धं
सन्तापश्रान्तिदायी सुखयतु हृदयं कम्बलोकाकली वः ॥ १ ॥
निजनिर्मितसिद्धान्तरत्नाकरसमुद्धृतां ।
करोमि कालवत् स्वल्पां सिद्धान्तमणिमञ्जरीं ॥ २ ॥

समाप्तिवा॰ । वैधेयो भातु विधेयो भवतितरां तत्र नैव मे खेदः ।
दोषज्ञा दोषज्ञा न गुणज्ञा एतदाश्चर्यम् ॥ ११२ ॥
इति वन्द्यघटीयश्रीराजारामसिद्धान्तभट्टाचार्यात्मजश्रीवेचारामन्यायालङ्कारविर-चिता सिद्धान्तमणिमञ्जरी सम्पूर्णा ॥

विषयः । ग्रन्थकारनिवेदनं । राशिविभागः । राशिविशेषसञ्ज्ञा । क्षेत्रकथनं । होरा-द्रेष्काणकथनं । नवांशः । द्वादशांशः । त्रिंशांशः । लग्नादिभावाः । षड्वर्गाः । ग्रहदृष्टिः । रवेर्मित्रं । रवेः शत्रुः । चन्द्रस्य मित्रं । कुजशत्रुमित्रे । बुधशत्रुमित्रे । गुरुशत्रुमित्रे । शुक्रशत्रुमित्रे । शनिशत्रुमित्रे । राहुशत्रुमित्रे । केतुशत्रुमित्रे । तात्कालिकमित्रादि । गोचरः । चन्द्रताराग्रहेरावश्यकं । चन्द्रशुद्धिः । ताराशुद्धिः । नक्षत्रयोगाः । सप्तलग्नः । पाठान्तरेण लघुलग्नः । अधोमुखलग्नः । ऊर्द्धमुखलग्नः । पुष्पलग्नः । नक्षत्रमुहूर्त्ताः । पुष्यप्रशंसा । वार-वेला । इत्यादिविविधज्योतिर्विषया वर्णिताः ।

No. CCCVII.

Yatyáchára-Sangraha. A manual of the duties of a Yati, by Vis'-ves'vara Sarasvatí. The MS. found contains only the rules for the funeral of Yatis, and is entitled Yatisañskára Prayoga.

३०७ । यत्याचारसङ्ग्रहीययतिसंस्कारप्रयोगः ।

ग्रन्थकारः विश्वेश्वरसरस्वती ।

विवरणं । नवीनं परिशुद्धञ्च । प० १ । पङ्क्ति० ११ । श्लो० २५ । व० वङ्गीयं । आ० तुलटकाकारः । का०—? । स्था० वर्द्धमानप्रदेशान्तर्गतसमानकरग्रामस्थश्रीयुतवासुचितशास्त्रिमिश्रः ।

प्रा० भाग्यं । अथ यतिसंस्कारः । तद्व्यवस्था विश्वेश्वर्य्याचारसङ्ग्रहोक्ता यथा,

शौनकः । अथवा जाग्रतया च भिक्षुके मृतजीविते ।

संकुर्य्यात् ब्राह्मणो विद्वान् ग्रही धर्म्मपरायणः ॥

अव्यत्वादपूर्णोऽगौविश्वेश्वरसरस्वतीनां । अवत् परमेष्ठिगुरूणां शिवाद काचाय्येति ।

असंस्कृतं विनिर्य्येत यत्र देहे कलेवरं ।

सर्व्वलोपो भवेत्तत्र दुर्भिक्षं मरकादिकं ॥

समाप्तिभा० । परमानन्दपूर्व्वकं अक्षयत्वं व्रजेयुः ।

इति विश्वेश्वरसरस्वतीविरचितयत्याचारसङ्ग्रहीययतिसंस्कारप्रयोगः समाप्तः ॥

विषयः । सन्न्यासिक्रिया ।

No. CCCVIII.

Panchikarana Várttika. A metrical paraphrase of S'ankara Áchárya's *Panchikarana, Prakriyá,*—a disquisition on the union of the five elements in the formation of the universe, and the means of redemption therefrom. By Súres'vara Áchárya.—Vide Hall's *Contributions*, 139.

३०८ । पञ्चीकरणवार्त्तिकं ।

ग्रन्थकारः सुरेश्वराचार्य्यः ।

विवरणं । नवीनं परिशुद्धञ्च । प० ४ । पङ्क्ति० ४—१९ । श्लो० १०० । व० वङ्गीयं । आ० तुलटकाकारः । का०—? । स्था० वर्द्धमानप्रदेशान्तर्गतसमानकरग्रामस्थश्रीयुतवासुचितशास्त्रिमिश्रः ।

प्रा० भाग्यं । ओङ्कारः सर्व्ववेदानां सारतत्त्वप्रकाशकः ।

तेन चित्तसमाधानं मुमुक्षूणां प्रकाश्यते ॥ १ ॥

आसीदेकं परं ब्रह्म नित्यमुक्तमविक्रियं ।

तत् स्वमायासमावेशात् बीजमव्याकृतात्मकं ॥ २ ॥

समाप्तिभा०। समभ्यसेद्दिवारात्रं श्रीमान्नास्तिकधीः सुधीः ।

रागद्वेषादिरहितः स्वात्मानं चिन्तयेत् सदा ॥ ६४ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीमच्छङ्करभगवत्पूज्यपादशिष्यसुरेश्वराचा-र्य्यस्य कृतौ पञ्चीकरणवार्त्तिकं समाप्तम् ॥

विषयः। आधिभौतिकमोक्षादीनामनवधानाद्यपरिहारात् पुस्तकात् सतन्त्रमिदं। सङ्क्षेपेण प्रपञ्चपञ्चीकरणवर्णनं ॥

No. CCCIX.

Prasthána-bheda. Essay on the different schools of the Vedanta Philosophy. By Madhusúdana Sarasvatí.

३०९। प्रस्थानभेदः।

ग्रन्थकारः मधुसूदनसरस्वती।

विवरणं। नवीनं परिष्कृतञ्च। प० ५। पङ्क्ति० ११। श्लो० ६६। स्था० वङ्गीयं। आ० तुलटकागजः। का०—?। प्रा० वर्द्धमानप्रदेशान्तर्गतमानकरग्रामस्थश्रीयुतबाबु-चितहारमिश्रः।

आ० भागं। अथ सर्व्वेषां शास्त्राणां भगवत्येव तात्पर्य्यं साक्षात् परम्परया चेति समासेन तेषां प्रस्थानभेदोऽत्र उद्दिश्यते। तथा हि। ऋग्वेदो यजुर्वेदः सामवेदोऽथर्व्व-वेद इति वेदाश्चत्वारः। शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति वेदा-ङ्गानि षट्। पुराणन्यायमीमांसाधर्म्मशास्त्राणि चेति चत्वार्य्युपाङ्गानि। अत्र उपपुराणानामपि पुराणे अन्तर्भावः।

समाप्तिभा०। तत्र तेषां तात्पर्य्यमबुद्ध्वा वेदविरुद्धेऽप्यर्थे तात्पर्य्यमुत्प्रेक्षमाणास्तन्मतमेवोपादेय-त्वेन गृह्णन्तो जना नानापथजुषो भवन्ति इति सर्व्वमनवद्यं।

इति श्रीमधुसूदनसरस्वतीविरचितः प्रस्थानभेदः समाप्तः ॥

विषयः। वेदान्तशास्त्रीयप्रस्थानविशेषनिरूपणं।

No. CCCX.

Syámá-pradípa. A manual for the worship of Syámá. Contents: 1. The derivation of the mystic mantra of the Devi. 2. The mode of worshiping her. 3. Prayers. 4. Fee &c. 5. Purification. 6. Natures of the worshipers and the worshiped. 7. Occasional worship. 8. Esoterics of the cult. 9. What are desirable objects. 10. Ritual for the worship of Tárá. 11. Especial worship. 12. Hymns and prayers. 13. Expiations, &c.

३१०। श्यामाप्रदीपः।

ग्रन्थकारः——?।

विवरणं। परिमाणं। प० १४९। पङ्क्ति० ६—७। श्लो० २०००। व० बङ्गीयं। आ० तुलटकागजः। का०—?। स्था० नवद्वीपान्तर्गतकृष्णनगरस्थमहाराजश्रीयुतसती-शचन्द्रः।

आ० भागः। नमामि परदेवतां प्रणतकार्य्यसिद्धिप्रदां गणेशकमलापतिप्रभृतिदेवदेवस्तुतां।
अनेकजनमार्ज्जितप्रचितपुण्यलभ्याम्बिकां निरञ्जनमहाम्बरप्रपुरविम्बकान्ताननां॥

समाप्तिभा०। लोकैर्ज्ञायते न तु तद्वान्तरमिति (?) तथाचेति। इत्याद्यो विचारः।
इति श्यामाप्रदीपे ताराकल्पे त्रयोदशपरिच्छेदः॥

विषयः। १, देवता मन्त्रोद्धारविनिर्णयः। २, पूजाविधिः। ३, कवचादिकथनं। ४, दक्षिणा-विचारं। ५, पुरश्चरणं। ६, भावनिर्णयः। ७, नैमित्तिकनिरूपणं। ८, शेषनि-र्णयः। ९, काम्यविचारं। १०, ताराकल्पः। ११, देवताचर्च्चनं। १२, विशेषतः कवचादिकथनं। १३, प्रकीर्णप्रकरणं॥

No. CCCXI.

Achára-málá. Rules of conduct, or what to do and what to avoid. By Nidhiráma S'armá.

३११। आचारमाला।

ग्रन्थकारः निधिरामशर्म्मा।

विवरणं। परिमाणं कस्यचिल्लिखितस्य। प० ४२। पङ्क्ति० ६—७। श्लो० ८००। व० बङ्गीयं। आ० तुलटकागजः। का०—?। स्था० नवद्वीपान्तर्गतकृष्णनगरस्थमहाराज-श्रीयुतसतीशचन्द्रः।

प्रा० भागः। नत्वा विघ्नविनाशाय देवेन्द्रं गणनायकं।
दुर्गां दुर्गतिनाशाय शिवाय च शिवं गुरुं॥
आचारमाला नाम (?) स्मृतितन्त्रानुसारिणी।
क्रियते निधिरामेण द्विजेन प्रीतये सताम्।

समाप्तिभा०। खण्डितं।

विषयः। सदाचारनिरूपणम्।

No. CCCXII.

Dánavákyávalí. Consecration of various kinds of gifts, and the merits of bestowing them upon particular persons.

३१२ । दानवाक्यावली ।

ग्रन्थकारः———?

विवरणं । परिमाणं नवीनच । प० १०९ । पङ्क्ति० ९—७ । श्लो० १५०० । अ० वङ्गीयं ।
धा० तुलटकागजः । शकाब्दाः १६८५ । स्था० नवद्वीपान्तर्गतकृष्णनगरस्थ-
महाराजश्रीयुतसतीशचन्द्रः ।

प्रा० वाक्यं । देशे काले तथा पात्रे धनं न्यायार्जितं तथा ।
यद्दत्तं ब्राह्मणश्रेष्ठास्तद्दानं प्रकीर्त्तितं ॥
मत्स्यपुराणे, न्यायेनार्ज्जनमर्थस्य वर्द्धनञ्चाभिरक्षणं ।
सत्पात्रे प्रतिपत्तिश्च सर्व्वशास्त्रेषु गीयते ॥

समाप्तिवा० । ततः कुशादीनादाय अमुकनामगोत्रायेत्यादि । इतिश्च च ।
वर्षे गौडमहीभुजः श्रितिधरित्र्याधिपस्यात्रिके यस्मै
पञ्चम्यां क्षणुमन्दने रतिपतिः श्रीमानसौ गोपदा ।
एतत् पुस्तकमुत्तमं गुणगणग्रामाभिरामाय वै
गोविन्दार्च्चनतत्पराय भवते श्रीरामपाणेऽस्तु ते ॥

विषयः । तिरस्तैजसरजतरत्नाकल्पपुष्परामादिमहिषीमधेनुवृषभगवाश्वाजादिपयस्विग-
घृतधेनुतिलधेन्वादिविविधदाननिरूपणं ॥

No. CCCXIII.

Kámarúpíya-nibandha Tantra. Various kinds of potentates, kings, and emperors, the curse of Vasistha on drinkers of spirits, &c.

३१३ । कामरूपीयनिबन्धतन्त्रं ।

ग्रन्थकारः———?

विवरणं । प्राचीनमपरिमृष्टच । प० ८० । पङ्क्ति० ९—९ । श्लो० १००० : अ० वङ्गीयं । धा०
पत्रविशेषः । का०—? । स्था० नवद्वीपान्तर्गतकृष्णनगरस्थमहाराजश्रीयुतसतीश-
चन्द्रः ।

प्रा० वाक्यं । देव्युवाच । भगवन् सर्व्वधर्म्मज्ञ चन्द्राचिह्नविभूषण ।
चिरञ्जीविनां धर्म्मः सूचय कथितास्त्वया ॥

निर्णीतं लक्षणं तेषां यथानुक्रमयोगतः ।

ब्रह्मचर्ये तथा गार्हे वानप्रस्थाश्रमेऽपि च ॥

समाप्तिवा०। खण्डितं ।

विषयः । हरगौरीसमागमराजनिर्णयवशिष्ठशापचक्रवर्त्तिनियमादिवर्णनम् ।

No. CCCXIV.

Nirdosha-kula-sáráralí. Kulins, their attributes, defects, and genealogy. The bulk of the work is in Sanscrit, but in some places the Bengali language is introduced.

३१४ । निर्द्दोषकुलसारावली ।

ग्रन्थकारः———?

विवरणं । प्राचीनमपरिशुद्धञ्च । प० १८१ । पङ्क्ति० ९—१२ । श्लो०९००० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । स्था० नवद्वीपान्तर्गतहट्‌टखोलनगरस्थश्रीयुतहोपारामशिरोरत्नः ।

प्रा० वाक्यं । अथ दुर्व्वलिप्रकरणं । दुर्व्वले वार्णिंयं चार्हता चरविन्दजः न्यून नु शिरो बङ्गकारं स्तवीषा उभोजः उचित नु विकर्णन साधुः उभोजः शिरो बङ्गकरणात् पर विकर्णनप्राप्तित्वात् दुर्व्वलेः साधुः केचित् इत्यादि ।

समाप्तिवा०। सर्व्वे द्वादशकाठोनिवासिनः ।

इति निर्द्दोषकुलसारावल्यां काञ्जीकुलं समाप्तम् ।

विषयः । पुस्तिकादौ संस्कृतभाषया लिखिता । परन्तु कुत्र कुत्रचित् वङ्गभाषापि विद्यते । अत्र कुलीनानां लक्षणादि वंशावलिश्च वर्णते । कुलीनानां प्रभेदश्च विद्यते ॥

No. CCCXV.

Deśíyarája-śekhara-kosha. A dictionary of Synonyms. By Panchánana Bhaṭṭáchárya.

३१५ । देशीयराजशेखरकोषः ।

ग्रन्थकारः पञ्चाननभट्टाचार्य्यः ।

विवरणं । अपरिशुद्धं प्राचीनञ्च । प० ३ । पङ्क्ति० ९—१ । श्लो० ९० । अ० वङ्गीयं । आ० तुलटकागजः । का०—? । नवद्वीपान्तर्गतहट्‌टखोलनगरस्थमहाराजश्रीयुक्तमतोशचन्द्रः ।

प्रा० वाक्यं। शारस्वतरहस्यानि रसमुद्रि पदे पदे।

सर्व्वस्वानि कवीन्द्रस्य शब्दतत्त्वानि बोधत ॥

सामजः सिन्धुरः कुम्भी मदकन्दो महाबलः।

कुञ्जरे कुन्दरोमाद्यैर्नीलमाकर्णनेषु ये (?) ॥

पारावतः कलरवे गुञ्जनं गजमज्जने।

कादम्बिनी मेघराजि रवो रावे भुजा भुजे ॥

समाप्तिवा०। कण्ठीरवस्तु पारीन्द्रो मृगेन्द्रे तरलं तथा। इति देशीयराजशेखरकोषः ॥

विषयः। पर्यायशब्दकथनम् ॥

No. CCCXVI.

Syámá-nitya-pújá-paddhati. A manual for the daily worship of Syámá.

३१६। श्यामानित्यपूजापद्धतिः।

ग्रन्थकारः———?

विवरणं। प्राचीनं परिमाणम्। प० १८। पङ्क्ति० ९—६। श्लो० २००। च० मध्यमं। का० पद्यविशेषः। का०—?। स्था० नवद्वीपान्तर्गतकृष्णनगरस्थमहाराजश्रीयुक्तसतीशचन्द्रः।

प्रा० वाक्यं। हस्तौ पादौ प्रक्षाल्य। ॐ सूर्य्यः सोमः यमः कालो महाभूतानि पञ्च च।

एते शुभाशुभस्येह कर्म्मणो नव साक्षिणः ॥

समाप्तिवा०। ॐउच्छिष्टचाण्डालिन्यै नम इति निर्म्माल्येन सम्पूज्य दक्षिणां कुर्य्यात् ॥

विषयः। कालिकाराधनानुष्ठानकथनम्।

No. CCCXVII.

Krishi-vishaya. A guide to agriculture.

३१७। कृषिविषयः।

ग्रन्थकारः———?

विवरणं। प्राचीनं परिमाणम्। प० ५ पङ्क्ति० ४। श्लो० १००। च० जीर्णं। का० तुलटकागजः। का०—?। स्था० नवद्वीपान्तर्गतकृष्णनगरस्थमहाराजश्रीयुक्तसतीशचन्द्रः।

प्रा० वाक्यं। जयति पराशरनामा मुनिः कृषिकर्म्मधर्म्मवेत्ता।

कृषका यस्य मतज्ञा वसुधां कर्षन्ति सर्व्वदा।

No. CCCXXXV.

Kálikú-máhátmya. Praise of Kálíká, a manifestation of the Devi: a compilation from some of the Tantras.

३३५ । कालिकामाहात्म्यम् ।

ग्रन्थकारः——?

विवरणं। प्राचीनमपरिशुद्धञ्च। प० ११। पङ्क्ति० ५। श्लो० १३०। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० नवद्वीपान्तर्गतकृष्णनगरस्थमहाराजश्रीयुतसतीशचन्द्रः।

आ० वाक्यं। श्यामामोदतरङ्गिण्यां। सावधानमते देवेशि कालिकानामतः फलं।
ककारो वाञ्छितं दत्ते धनपुत्रादिकान् परान्॥

समाप्तिवा०। अधस्तात् सप्तहापि येन काली कृता परा।
मुक्तिस्तस्य करे देवि नात्र कार्य्या विचारणा॥ इति कालिकानाममाहात्म्यं॥

विषयः। कालिकाया महत्त्वज्ञापनम्॥

No. CCCXXXVI.

Vidyá-máhátmya. Praise of Ádyá Vidyá and the mode of worshiping her. This work is likewise a Tantric compilation.

३३६ । विद्यामाहात्म्यम् ।

ग्रन्थकारः——?

विवरणं। प्राचीनमपरिशुद्धञ्च। प० ३। पङ्क्ति० ९-९। श्लो० ४०। अ० वङ्गीयं। आ० तुलटकागजः। का०—?। स्था० नवद्वीपान्तर्गतकृष्णनगरस्थमहाराजश्रीयुतसतीशचन्द्रः।

आ० वाक्यं। श्यामार्चनचन्द्रिकाधृतमात्स्ये। अस्या विद्यानमात्रेण कुलकोटीः समुद्धरेत्।
नन्दन्ति पितरः सर्व्वे गाथां गायन्ति ते मुदा॥

समाप्तिवा०। चन्द्रसूर्य्यसमो भूत्वा वसेत् कल्पायुतं दिवि।
न तस्य दुर्लभं किञ्चित् यः स्मरेत् कालिदक्षिणां॥
इति विद्यामाहात्म्यं समाप्तं॥

विषयः। आद्याविद्याया महत्त्वप्रतिपादनम्॥

---

३१९ । आचारसारप्रकरणं ।

ग्रन्थकारः——?

विवरणं। प्राचीनलपरिग्रहच। प॰ २२। पङ्क्ति॰ ५। श्लो॰ ४५॰। च॰ नवीनं। चा॰ तुलटकागजः। शकाब्दाः १६९१। स्था॰ नवद्वीपाभ्यन्तरव्यवस्थितगरस्थमहाराज-श्रीयुक्तसतीशचन्द्रः।

प्रा॰ वाक्यं। देवुवाच। महाचीनक्रमाचारः कथितो न प्रकाशितः।
इदानीं श्रोतुमिच्छामि कथयस्व महेश्वर॥

समाप्तिवा॰। एतत्ते कथितं सर्वं विजयाकल्पमुत्तमं।
प्रसादादस्य विरादस्य वाञ्छितं ते भविष्यति॥
इति शक्तिसंगमतन्त्रे आचारसारप्रकरणे सप्तमः पटलः॥

विषयः। भगवतो गुरुदेवस्य माचाल्यवर्णनेन महाचीनाचारस्य गौरवमुक्तं प्रश्नका। शिवेनैतद्देवीं भगवत्यै॥

No. CCCXX.

Smárta-vyavasthárṇava. Responsa prudentum, on various questions of Hindu law. By Raghunátha.

३२०। स्मार्त्तव्यवस्थार्णवः।

ग्रन्थकारः रघुनाथः।

विवरणं। प्राचीनलपरिग्रहच। प॰४४। पङ्क्ति॰ ४—९। श्लो॰ ९००। च॰ नवीनं। चा॰ तुलटकागजः। का॰—?। स्था॰ नवद्वीपाभ्यन्तरव्यवस्थितगरस्थमहाराजश्रीयुक्त-सतीशचन्द्रः।

प्रा॰ वाक्यं। नत्वा श्रीरघुनाथ ईश्वरपदाम्भोजं गुरं सादरात्
मन्वादिस्मृतिमर्न्थितार्थमवधार्य्याचार्य्यवाक्येन च।
बालानां पटुताविधायकमनु स्मार्त्तव्यवस्थार्णवं
राघवोयुतराघवस्य कुरुते राद्धमतो निर्मले॥
तिथितत्त्वान्यशौचेषु द्रव्यशुद्ध्यधिकारिणोः।
प्रायश्चित्तोद्वाहदायेष्वपि वाचोऽस्य निर्णयः॥

समाप्तिवा॰। खण्डितं।

विषयः। रघुनन्दनमहाचार्य्यसङ्कलितधर्मशास्त्रीयकतिपयविषयव्यवस्थायाः सङ्क्षेपेण प्रतिपादनम्॥

No. CCCXXI.

Kávya-prakás'a-rahasya-prakása. A commentary on the Kávyapraká's'a of Mammatta Bhatta. By Rámanátha Vídyáváchaspati.

३२१ । काव्यप्रकाशरहस्यप्रकाशः ।

ग्रन्थकारः रामनाथविद्यावाचस्पतिः ।

विवरणं । प्राचीनमपरिशुद्धञ्च । प॰ ११६ । पङ्क्ति॰ ७—८ । श्लो॰ १८०० । व॰ बङ्गीयं । का॰ तुलटकागजः । का॰—? । स्था॰ नवद्वीपान्तर्गतब्रह्मनगरस्थलचाराणमौलुस्वती-प्रपन्नः ।

प्रा॰ वाक्यं । अजमिश्रयज्ञवदश्वं सततमुपास्यं मुनीन्द्राणां ।
वेदान्तनिहितरहस्यं गिरिजनमस्यं नमस्यामः ॥
मौलीभूतसुधांशुमाहरहरद्रसुत्याकृताशेषनं
रम्यं धार्ह्यविलोचनं भयपरिशाणाय्यमार्ह्यचनं (?) ।
यद्गं नामकरेण सव्यचरणमुक्ताम्बहोःपद्मनं
व्यामुक्त्वाखिरया पदाव्जपतनं शैवं वपुः पातु वः ॥
निःशेषशास्त्रसारं वारं वारं विचार्य्य चिन्मानः ।
काव्यप्रकाशगूढं विद्यावाचस्पतिर्विकाशयति ॥

समाप्तिवा॰। खण्डितं ।

विषयः । मम्मटभट्टप्रणीतकाव्यप्रकाशार्थविवरणं ।

No. CCCXXII.

Panchama-sára-sañhitá. Dissertations on the notes of the Hindu gamut. By Nárada.

३२२ । पञ्चमसारसंहिता ।

ग्रन्थकारः नारदः ।

विवरणं । प्राचीनं परिशुद्धञ्च । प॰ ११ । पङ्क्ति॰ ९—५ । श्लो॰ २०० । व॰ बङ्गीयं । का॰ तुलटकागजः । का॰—? । स्था॰ नवद्वीपान्तर्गतब्रह्मनगरनिवासिश्रीयुतवाबु-ब्रजानन्दरायः ।

प्रा॰ वाक्यं । मधुरध्वनिध्यानमौलुकोकिलमालिनः ।
वातञ्जाच मनोचाकः वरायैतान् ऋतुर्नतान् ॥

विवाहर्क्षमासाचारबद्धलक्षणचैवताः ।
पञ्चमवेलकी यत्र मन्त्रोकचोदिताः स्फुटाः ॥

समाप्तिः। खण्डितम् ।

विषयः । विवाहादिविवाहरणासमूर्ध्वमादिनिरूपणम् ।

No. CCCXXIII.

Koshṭhi-pradipa. Elements of horoscopy. By S'rínátha Bhaṭṭa.

३२३ । कोष्ठीप्रदीपः ।

ग्रन्थकारः श्रीनाथभट्टः ।

विवरणं । प्राचीनमपरिशुद्धञ्च । प० १८ । पङ्क्ति० ७—९ । श्लो० २५० । अ० नवीनं । स्था० गुरुकालजः । का०—? । स्था० नवद्वीपान्तर्गतश्यामनगरग्रामनिवासिश्रीयुतमाधु- समानन्दरायः ।

प्रा० वाक्यं । नतिन्नामकिलापस्य प्रभावात् प्रभविष्यते ।
सर्व्ववेदार्थतत्त्वाय कर्मीचित् चेयचे नमः ॥
तस्यापि यत्नेन विवस्य भूयसा ग्रहप्रभावोक्तमहासारकोष्ठं ।
श्रीनाथभट्टः सुरनिवमालके कोष्ठीप्रदीपं विदधे विपश्चितः ॥

समाप्तिः। विवाहितायाः पतिपक्षेणैव फलमतीतं, अविवाहितायाः सम्यं स्थानं फलजन- नाय विचार्य्यमिति भावः ।
इति कोष्ठीप्रदीपे तनुविवाहादिप्रकाशिका समाप्ता ॥

विषयः । तन्वादिद्वादशस्थानविचारकोष्ठादिनिरूपणं ।

No. CCCXXIV.

Panchapakshí Tiká. A commentary, by Rághavanandana, on the Pancha-pakshí, a treatise on horoscopy.

३२४ । पञ्चपक्षीटीका ।

ग्रन्थकारः राघवनन्दनः ।

विवरणं । प्राचीनमपरिशुद्धञ्च । प० २० । पङ्क्ति० ९ । श्लो० २०० । अ० नवीनं । स्था० गुरुक- कालजः । का०—? । स्था० नवद्वीपान्तर्गतश्यामनगरग्रामनिवासिश्रीयुतमाधु-समानन्दरायः ।

आ० वाक्यं। यद्यपि च सूर्यादिति। अवशकालात् कार्त्तिकवर्षादिगणनया चान्द्रः संवत्सरा गताश्च एव चयः। राशिसंक्रान्त्यादिकंसकालीनो मासः स्वरोऽपि। अत्र मासाचरं तदङ्कं स्वादिरूपं तदा च शुक्लैकादश्यादौ अन्यानि यथोक्तं एवं देयं॥

समाप्तिवा०। एतावीतवर्त्तं कला पापं ज्ञेयं, एवं विपापे विपापीति॥

इति श्रीराघवानन्दविरचिता पञ्चपक्षीटीका समाप्ता॥

विषयः। प्रश्नादिगणनाप्रतिपादकपञ्चपक्षीयतात्पर्य्यविवरणम्।

No. CCCXXV.

Śuddhidípiká. Astrological disquisitions on auspicious and inauspicious days. By S'rínivása.

३२५। शुद्धिदीपिका।

ग्रन्थकारः श्रीनिवासः।

विवरणं। प्राचीनतमपरिमाणम्। प० ८५। पङ्क्ति० ४—५। श्लो० १०००। आ० वर्त्तुलं।
लि० तुलटकाक्षरः। का०—?। स्था० नवद्वीपान्तर्गतब्राह्मणनगरनिवासिश्रीयुत-
बाबु-रामानन्दरायः।

आ० वाक्यं। ब्रह्मातरङ्गतुङ्गसंसाराम्भोधिमज्जने तरणिः।
उद्धवतु चाचराचरमुकुटमणिः (?)॥
यत्नं नतवति शिशिरेऽतिमलिनदोषाकुले च गोविभवे।
उदाहादिषु शुद्धिसम्पत्त्यर्थं दीपिका क्रियते॥

समाप्तिवा०। रिपुरन्ध्रचन्द्रमसता मयमि चाचारिनिधनस्थाः। एतस्य देवलोकादिगति-
निर्णयः।
दुर्विचारे ज्योतिषि यमतः कलां समस्तकर्मव्यवहारदर्शिकां।
श्रीश्रीनिवासेन समाहृताभिनामसत्प्रकराः पठन्त शुद्धिदीपिकां॥
इति शुद्धिदीपिकायां यात्रानिर्णयो नामाष्टमोऽध्यायः॥

विषयः। लग्नविवाहयात्रादीनां निरूपणं।

No. CCCXXVI.

Vittranmanoramá. A commentary on a hymn to Chandiká in the Márkandeya Puráṇa. By Gaurívara S'armá.

३२६ । विद्वन्मनोरमा ।

ग्रन्थकारः गौरीवरशर्म्मा ।

विवरणं । प्राचीनं परिशुद्धञ्च । प० ७१ । पङ्क्ति० ९—७ । श्लो०२५०० । बं० वर्णीयं । या० तुलटकागजः । का०—? । स्था० नवद्वीपान्तर्गतब्राह्मणनगरनिवासिश्रीयुतबापुजना- नन्दरायः ।

प्रा० वाक्यं । समाधिर्नाम वैश्योऽसमुत्पन्नो वणिजां कुले ।
पुत्रदारैर्निरस्तश्च धनलोभादसाधुभिरिति श्लोकात् सप्तमपत्राच लिख्यते ।

समाप्तिवा०। वैवस्वतेऽन्तरे प्राप्ते यज्ञार्धिंशतिमे युगे ।
मृण्मो निमुञ्जवैवान्यायुष्मन्सेते मचान्तरामित्यतः श्लोकात् ७१ पत्राच वर्णिता ॥

विषयः । मार्कण्डेयपुराणान्तर्गतचण्डिकाशोपनतात्पर्य्यव्याख्यानं ॥

No. CCCXXVII.

Grantha-Sangraha. A collection of rules and maxims for calculating nativities, &c. By Prajápati Dása. . At the end of the work there is a collection of the astrological maxims of Khauá, in Bengali.

३२७ । ग्रन्थसङ्ग्रहः ।

ग्रन्थकारः प्रजापतिदासः ।

विवरणं । प्राचीनमपरिशुद्धञ्च । प० १४ । पङ्क्ति० ५—८ । श्लो० २०० । बं० वर्णीयं । या० तुलटकागजः । का०—? । स्था० नवद्वीपान्तर्गतब्राह्मणनगरनिवासिश्रीयुतबापु-जना- नन्दरायः ।

प्रा० वाक्यं । इष्टदेवं नमस्कृत्य गोपालं कुलदैवतं ।
श्रीप्रजापतिदासेन क्रियते ग्रन्थसङ्ग्रहः ॥
नवपत्रान्नमस्कृत्य देवीञ्चैव सरस्वतीं ।
प्रणिपत्य गुरुं सूक्ष्मं ज्योतिर्ग्रन्थं वदाम्यहं ॥

समाप्तिवा०। काला बोड़ा तुमि अनेषर मानुषमारे पोड़ाय घर । कोन चापड़ पड़े पीठे चातुकेर वाड़ी माय उठे ॥ म ॥ केतुकृष्णशिर्नीयता भमार्त ॥

विषयः । विप्रादिहस्तावरिष्टपित्रादिहदण्डपलादिनिर्णयः । पुंजन्मस्त्रीजन्मज्ञानादिनिर्णयः । आरम्भज्ञानं । शुभदुःखादिनिर्णयः ।
षष्ठाध्याये ग्रन्थसमाप्तिः । खनायाः वचनमपि भङ्गभाषोक्तं ।

No. CCCXXVIII.

S'akuna-dípiká. On good and evil omens. By Ganes'a.

३२८। शकुनदीपिका।

ग्रन्थकारः गणेशः।

विवरणं। परिशुद्धं प्राचीनञ्च। प० ९। पङ्क्ति० ८। श्लो० १००। अ० बङ्गीयं। आ० तुलट-कागजः। का०—?। स्था० नवद्वीपान्तर्गतबल्लभनगरनिवासिश्रीयुतबाबु-उमानन्द-रायः।

प्रा० वाक्यं। वाञ्छाकल्पतरुं नृणां संसाराम्भोधिपारदं।
लम्बोदरपदाम्भोजद्वन्द्वं वन्दामहे वयं॥
अज्ञानतिमिरध्वंसकारिणी दृष्टदर्शिनी।
तन्यते श्रीगणेशेन मुदा शकुनदीपिका॥

समाप्तिवा०। खण्डितं॥

विषयः। अत्र शुभाशुभसूचकनिमित्तानि विद्यन्ते।

No. CCCXXIX.

Guru-páduká-panchaka-stotra Tiká. A commentary on five hymns in praise of the great guru; attributed to Mahádeva. By Durgádása Vídyáváchaspati.

३२९। गुरुपादुकापञ्चकस्तोत्रटीका।

ग्रन्थकारः दुर्गादासविद्यावाचस्पतिः।

